॥ श्रीः ॥

सर्वसिद्धान्तसारासारविवेचनम्

(दशमः परिच्छेदः)

सर्वतन्त्रस्वतन्त्रश्रीमद्विजयीन्द्रतीर्थगुरुसार्वभौमविरचितम्

SARVASIDDHANTASĀRĀSĀRA VIVECHANAM

(TENTH CHAPTER)

BY

SRIMADVIJAYEENDRATEERTHA GURUSĀRVABHOUMA

PUBLISHED BY

BRINDAVANAM OFFICE, MANTRALAYAM (P. O.)

Adoni Tq., Kurnool Dt. (A. P.)

॥ श्रीः ॥

सर्वसिद्धान्तसारासारविवेचनम्

सर्वतन्त्रस्वतन्त्रश्रीमद्विजयीन्द्रतीर्थयतिसार्वभौमविरचितम्

प्रधानसंशोधकः

पण्डितराजः **यम्. यस्. रङ्गनाथाचार्यः**

अध्यक्षः, श्रीगुरुसार्वभौमसंस्कृतमहापाठशाला, श्रीमद्राघवेन्द्र-गुरुसार्वभौमबृन्दावनसन्निधानम्, सीतापत्यग्रहारः, बेङ्गळूरु

उपसंशोधकः

विद्याभूषणम् **यस्. वि. भीमभट्टः**, एम्.ए.

तर्कशास्त्रप्रधानाध्यापकः, श्रीचामराजेन्द्रसंस्कृतमहापाठशाला बेङ्गळूरु

आङ्ग्लभाषाभूमिकालेखकाः

डा० बि. एन्. के. शर्माणः

तथा

वेदान्तविद्वांसः, मीमांसाशिरोमणयः

प्रोफेसर के. टि. पांडुरङ्गीमहोदयाश्च

प्रकाशिका

बृन्दावनसंस्था, मन्त्रालयः

आदवानि तालुक्, कर्नूल् जिल्ला, आन्ध्रप्रदेशः

प्रथम मुद्रणम् १९७६

पुस्तकसंख्या १०००

सर्वाधिकाराः स्वायत्तीकृताः

प्रातिस्थानम् :

वृन्दावनसंस्था, मन्त्रालयः

मुद्रकः

प्रभा मुद्रणालयः, बसवनगुडि, बेंगळूरु-५६० ००४

SRI

SARVASIDDHANTASĀRĀSĀRA VIVECHANAM

BY

SRIMADVIJAYEENDRATEERTHA GURUSĀRVABHOUMA

EDITED BY

Asthana Vidwan, Panditaratnam, Vidyavisharada, Nyaya Vedanta Choodamani, Vedanta Bhooshanam, Panditaraja

Prof. M. S. RANGANATHACHAR

Retd. Senior Professor of Dwaita Vedanta and Principal Sri Chamarajendra Samskrita College Fort, Bangalore and Adhyaksha, Sri Gurusarvabhouma Samskrita Mahapathashala, Sri Raghavendra Swamy Mutt, Sitapati Agrahar, Bangalore

SUB-EDITOR

Tarka Sahitya Vedanta Vidwan, Vidya Bhooshana

S. V. BHEEMA BHAT, M.A.

Professor of Tarka

Sri Chamarajendra Samskrita College, Fort, Bangalore-18

With Introductions in English

BY

Dr. B. N. K. SHARMA, M.A., Ph.D., D.Litt.

Retd. Head of the Dept. of Sanskrit and Ardhamagadhi

Ruparel College, Bombay-16

AND

Prof. K. T. PANDURANGI, M.A.

Darshana Ratnam, Vedanta Vidwan, Meemamsa Siromani

Head of the Dept. of Sanskrit, University of Bangalore

PUBLISHED BY

BRINDAVANAM OFFICE, MANTRALAYAM (P.O.)

Adoni Tq., Kurnool Dt. (A.P.)

First Edition 1976
Copies 1000

All Rights Reserved

Printed at
PRABHA PRINTING HOUSE
BANGALORE-560 004

श्रीमत्परमहंसपरिव्राजकाचार्येत्याद्यमन्दबिरुदवृन्दविभूषितानां
श्रीमद्राघवेन्द्रगुरुसार्वभौमदिव्यपीठालङ्कृतानां
श्री १००८ श्रीमत्सुजयीन्द्रतीर्थश्रीपादानामनुग्रहवचनम्

सर्वसिद्धान्तसारासारविवेचनं नाम ग्रन्थरत्नं सायणमाधवाचार्यरचितात् सर्वदर्शनसङ्ग्रहादप्यतिशयितं योगितल्लजैराश्चर्यचरितैश्चतुरधिकशतग्रन्थरत्ननिर्माणनिपुणैश्चतुष्षष्टिकलापारङ्गतैः सर्वतन्त्रस्वतन्त्रैः परमपूज्यैः श्रीमद्राघवेन्द्रगुरुवरेण्यपरमगुरुभिः परैरजय्यैः श्रीमद्वेदान्तसाम्राज्यधुरन्धरैः श्रीमद्विजयीन्द्रतीर्थयतिसार्वभौमैः समारचितं श्रीमद्बादरायणविरचितश्रीमद्ब्रह्ममीमांसाशास्त्रीयसमयपादवन्मतान्तरप्रक्रियानिराकरणात्मकं सच्छास्त्रप्रतिपाद्यसत्सिद्धान्तस्थापनात्मकं सकलमुमुक्षूणां तत्त्वविमर्शनचतुराणां विपश्चिदपश्चिमानाञ्चात्युपादेयमित्यत्र नास्ति कश्चिद्विशयलेशोऽपि । सम्प्रति तद्ग्रन्थरत्नस्यैकदेशो दशमः परिच्छेदो मुद्रापयित्वा प्राकाशि । ग्रन्थस्यास्य मुद्रणोपयुक्तशोधनादिकर्मस्वस्माभिराज्ञप्ताः पण्डितप्रकाण्डाः मागडिरङ्गनाथाचार्याः नियोजितमेतत्कार्यं सर्वाङ्गसुन्दरमकार्षुरतस्तेभ्यो विद्वद्भ्योऽस्मदुपास्यश्रीमद्राघवेन्द्रगुर्वन्तर्गतश्रीमुख्यप्राणान्तर्गतश्रीमन्मूलरामचन्द्रः सुप्रीतः श्रेयांसि भूयांसि इतोऽप्यधिकं ज्ञानभक्तिवैराग्यादिकञ्च दद्यादित्याशास्महे ।

श्रीमन्मन्त्रालयक्षेत्रम् 　　　　 इत्यनेकनारायणस्मरणानि

॥ श्रीः ॥

॥ श्रीलक्ष्मीहयग्रीवाय नमः ॥

पीठिका

सर्वोत्तमं सर्वगुणैरुदीर्णं सर्वाश्रयं सर्वसुरैरुपास्यम् ।
नारायणं भक्तगणैकलभ्यमानन्ददेहं प्रणमामि देवम् ॥ १ ॥

गुरून् मध्वमुखान् नत्वा तत्त्वज्ञानप्रदर्शकान् ।
निराकुर्मस्तामसानां ज्ञानं नित्यतमःप्रदम् ॥ २ ॥

अन्यथोपासका ये तु तेषां नित्यतमो ध्रुवम् ।
'असुर्या'श्रुतिवाक्येन ज्ञायते हितकांक्षिणा ॥ ३ ॥

तत्त्वज्ञानस्य हेतुत्वं मुक्तिं प्रति यथैवहि ।
मिथ्याज्ञानस्य निन्दायास्तथात्वं ज्ञायते तथा ॥ ४ ॥

श्रुतिसूत्रविरुद्धा तु प्रक्रिया तामसी खलु ।
दृश्यते पुष्कला नूनं विमर्शे दोषदूषिते ॥ ५ ॥

प्रमाणपुञ्जसम्पन्नं मध्वतन्त्रं हरेःप्रियम् ।
सुरवृन्दाभिसंसेव्यं तामसः कः कथं श्रयेत् ॥ ६ ॥

सारासारविवेकस्य विजयीन्द्रार्यसत्कृतेः ।
पीठिका लिख्यते तेषां गुरूणां करुणाबलात् ॥ ७ ॥

अथ प्रास्ताविकं किञ्चिदुच्यते ।

अयि भोः तत्त्वस्वरूपपरिशीलनपरायणाः प्रमाणैकशरणाः सहृदय-धुरीणाः साक्षात्कृतमेव वः श्रवणयोरुताहो नयनयोस्तत् यद्दर्शनानि नानाविध-प्रक्रियाप्रदर्शनपराणि जगत्यविद्यापटलपराहतनयनैः स्वपक्षनिक्षिप्तदृष्टिभिः

दुराग्रहगृहीतान्तरङ्गैः प्रवर्तितान्यापातरमणीयानि करालकलिप्रभावात्सज्जनचेतांस्यपि संशयविपर्ययास्कन्दितानि विधाय तत्त्वज्ञानशैथिल्यापादकानि भवन्तीति।

अनादिकालतः प्रवाहतः प्रवृत्तानां कुसमयानामुच्छेदासंभवात् गौतमशापात्मकासाधारणकारणबलात् नष्टधर्मतत्त्वज्ञानलोककृपालुभिर्ब्रह्मरुद्रेन्द्रादिभिर्देवैरर्थितो ज्ञानप्रदर्शनाय भगवान्नारायणो व्यासत्वेनावतीर्य प्रागेव ऋङ्निगदसामभेदेन विभक्तं वेदं ऋग्यजुःसामाथर्वभेदेन शाखाद्यात्मना च विभज्य तदर्थनिर्णायकन्यायनिबन्धनात्मकानि सूत्रवाङ्मयमूर्धन्यानि परब्रह्मपराणि सूत्राण्यररचत्। तस्याञ्च ब्रह्ममीमांसायां तेनैव भगवता बादरायणेन द्वितीयाध्यायस्य द्वितीयपादे (समयपादे) तावत् शुद्धबुद्धीनामीशानुग्रहयोगिनां निजभक्तानां बुद्धिशाणत्वसिद्धये तत्त्वज्ञानदार्ढ्याय च वेदानुसारिभिर्दृढतमैस्तर्कैर्न्यायाभासमूलानामापातप्रतिपन्नवेदार्थमूलानाञ्च मतान्तराणां भ्रान्तिमूलत्वव्यवस्थापनपूर्वकमप्रामाणिकत्वं निरणायि। यथावत्परमात्मज्ञानस्येवान्यथाज्ञाननिन्दनस्यापि मोक्षैकदेशफलनिष्पादकत्वात् मोक्षोपयोगित्वमन्धंतमः प्रविशन्तीत्यादिका श्रुतिराघोषयति। परमात्मयाथार्थ्यतिरस्कारतत्पराणां "आत्म हनो जनाः" इति निन्दापि तस्यामेव श्रुतौ श्रूयते। नित्यनिरतिशयात्यद्भुतानंदात्मकस्य हरेः ज्ञानानंदात्मकस्वरूपमन्यथाविज्ञायान्यथोपासकानां नित्यनिरयात्मकानर्थावाप्तिश्चास्मिन्नेव वेदवाक्ये "असुर्या नाम ते लोकाः" इत्यादावधिगम्यते। तस्मान्मोक्षाकांक्षिभिर्भगवदुपासकैः विशयाद्यनालिङ्गितपरमात्मज्ञानजप्रसादोदर्कतत्त्वज्ञानसम्पादने नितरां जागरूकैर्भाव्यमिति वारं-वारं सज्जनवृन्दमुद्बोधयन्ति वैदिकवचनानि।

तद्धैकआहुरसदेवेदमग्र आसीदित्यादीनि च तामसमतप्रत्याख्यानपराणि दरीदृश्यन्ते। वैदिकप्रक्रियाविरुद्धानां तेषां मतानां तामसपुरुषोपादेयत्वं मनुनापि प्रत्यपादि। तद्यथा—

या वेदबाह्याः स्मृतयो याश्च काश्चानुदृष्टयः ।
सर्वास्ता निष्फलाः प्रेत्य तमोनिष्ठा हि ताःस्मृताः ॥ इति ।

तस्मात् श्रौतसम्प्रदायमनुरुन्धानैर्मुमुक्षुभिरन्यथाज्ञानविनिन्दनस्यापि साधनकोटिनिविष्टत्वात् तदप्यवश्यमनुष्ठेयमेव । अनाद्यविद्यानिमित्तत्वात् बन्धस्य विना च तत्त्वज्ञानं तच्छैथिल्यं न सञ्जायत इति विशुद्धतत्त्वज्ञानोत्पत्तये तत्स्थैर्याय च सर्वसिद्धान्तसारासारपरीक्षणमत्यावश्यकमित्यत्र नास्त्येव विवादावकाशलेशोऽपि । अत एव सर्वतन्त्रस्वतन्त्रैः परैरजय्यैः योगितल्लजैः चतुःषष्टिकलापारङ्गतैश्चतुरधिकशतग्रन्थरत्ननिर्मातृभिः श्रीमद्भिर्विजयीन्द्रगुरुवरेण्यैः माधवाचार्यरचितात् सर्वदर्शनसङ्ग्रहादप्यतिशायितं "सर्वसिद्धान्तसारासारविवेचनं" नाम ग्रन्थरत्नं सरलया सरण्या समलङ्कृतं निरमायि। सर्वदर्शनसङ्ग्रहे तु चार्वाकादिदर्शनोदीरितप्रक्रियास्वरूपनिरूपणं केवलं परिदृश्यते । वेदादिसच्छास्त्रविरुद्धांशानां विशिष्य विमर्शनं वा सप्रमाणं निरसनं वा न पश्यामः। अत्र तु "यस्य यस्य मते या या प्रक्रियास्मद्विरोधिनी। तस्य तस्य मते सा सा पुष्कलानूद्य दूष्यते" इति ग्रन्थकृतां प्रतिज्ञानुसारेण ततोऽप्याधिक्येन सकललौकिकवैदिकप्रमाणविरुद्धाः परकीयाः प्रक्रियाः सप्रमाणं निराकृताः संदृश्यन्ते। अस्मात् ग्रन्थात् तत्त्वबुभुत्सूनां निर्विचिकित्सं तत्त्वज्ञानदार्ढ्यमुपजायत इत्यत्रैतद्ग्रन्थाध्ययनाध्यापनपरायणाः पण्डितप्रकाण्डा एव प्रमाणम् । किञ्चैतद्ग्रन्थनिर्मातृगुरुवरेण्यैर्विजयनगरसाम्राज्याधिपश्रीकृष्णमहीपालपरिपूजितपदपङ्कजैः वेदान्तसाम्राज्यदिग्विजयकीर्तिविख्यातैः श्रीमद्व्यासराजगुरुसार्वभौमैः स्वकीयधीमन्दरमहीभृता श्रीमध्वशास्त्रदुग्धाब्धिरामथ्य विबुधतृप्तये समुद्धृतं न्यायामृतमिव तच्छिष्यकोटिकिरीटायमानैर्महानुभावैः श्रीमद्विजयीन्द्रगुरुवरेण्यैरप्यस्मिन् निबन्धे सर्वसिद्धान्तोदधिः स्वासाधारणप्रतिभामन्थानदण्डेन समामथ्य समुद्धृतपीयूषकलशसदृशं सकललौकिकवैदिकप्रमाणपुञ्जपरिभूषितं श्रीमन्मध्वतन्त्रमन्ते समादर्शि। दृश्यते ज्ञायते तत्त्वमनेनेति व्युत्पत्त्या ज्ञानार्थकदृशिधातोः करणल्युटा व्युत्पन्नेन दर्शनशब्देन

तत्त्वविषयविचारप्रवणमागमात्मकं शास्त्रमुच्यते। दर्शनेषु नैकविधेषु जाग्रत्स्वपि यस्मिन् दर्शने सकलप्रमाणसामञ्जस्यमाञ्जस्येन विपश्चिद्भिर्निश्चितं तस्यैव सारत्वमन्येषामसारत्वमिति तत्त्वविमर्शनचतुराः निश्चिन्वन्ति। हैतुकाग्रगण्यानां नैयायिकानां नये च वेदापौरुषेयत्वानङ्गीकारात् परमात्मनोऽष्टगुणत्वाभ्युपगमात् दुर्बलानुमानावलम्बनेनार्थनिर्धारणाय प्रवृत्तेर्दर्शनात् सर्वोत्तमपुरुषोत्तमस्वरूपनिश्चयस्तत्प्रसादो वा न सञ्जायत इति तन्मतं नाद्रियामहे । सारासारविवेचनग्रन्थेऽस्मिन् तत्तन्मतसम्मतप्रक्रियाविमर्शनपुरस्सरं समयविभागप्रतिपादनन्तु ग्रन्थकृतामतिमात्रं जिज्ञासुजनचेतांसि रञ्जयति। उक्तञ्च ग्रन्थोपोद्घाते "तत्र समयास्त्रिविधाः। अवैदिकाः, वैदिकावैदिकाः, केवलवैदिकाश्चेति। तत्रावैदिकमतान्यनेकविधानि। लोकायतिकबौद्धार्हतपाशुपतादिभेदेन। तेषां वेदप्रामाण्यानभ्युपगमादवैदिकत्वम्। वैदिकावैदिकानि च मतानि सांख्ययोगनैयायिकवैशेषिककौमारिलवैयाकरणाख्यानि। तैर्वेदान्तप्रामाण्यानभ्युपगमात्। वेदान्तानां न्यायसिद्धार्थानुवादित्वोपगमाच्च मिश्रत्वम्। वैदिकमतानि च शङ्करयादवभट्टभास्कररामानुज श्रीकण्ठमध्वाचार्यप्रवर्तितानि। एतेषां कर्मब्रह्मकाण्डरूपसर्ववेदप्रामाण्याभ्युपगमात्। यद्यपि शङ्करयादवभास्करश्रीकण्ठप्रवर्तितानि मतानि क्वचित्क्वचित् वेदान्तानभिप्रेतार्थमूलतया वैदिकावैदिकेष्वेव निक्षेप्तुमुचितानि । तथापि तेषां कर्मब्रह्मकाण्डरूपसर्ववेदप्रामाण्याभ्युपगन्तृत्वाभिमानेन वैदिकतया तत्प्रवर्तितमतानामुपादानम्। यद्यपि मृषावादिना श्रीकण्ठेन च योगाचारमतं पाशुपतमतं चौपनिषदीकृतमिति न तयोः पृथक् परिगणनं दूषणं वा युज्यते। तथाप्यौपनिषदत्वनिराकरणार्थं तयोः पृथक् परिगणनं दूषणं च युज्यते । श्रीमन्मध्वाचार्यप्रवर्तितमतन्तु श्रुत्यभिप्रेतार्थमूलं सकलप्रमाणाविरुद्धार्थं चेति तदेव तत्त्वबुभुत्सुभिर्मुमुक्षुभिश्च परिग्राह्यम् । यथाचैतत्तथाग्रे स्पष्टीकरिष्यते" इति। आहत्यैकादशपरिच्छेदपरिभूषितेऽस्मिन् सारासारविवेचनग्रन्थे चार्वाकादिपञ्चदशदर्शनानामसारत्वं सप्रमाणमुपावर्णि। "अन्ते-

सिद्धस्तुसिद्धान्तः मध्वस्यागम एवही''ति प्राज्ञशिखामण्युक्तरीत्या ग्रन्थान्त्यभागे श्रीमदानन्दतीर्थभगवत्पादप्रदर्शितश्रीमद्बादरायणोपदिष्टप्रक्रियायाः सारतमत्वं प्रामाणिकत्वं सामञ्जस्यं च निपुणतरं निरणायि। दशमपरिच्छेदे तावत् रामानुजमतप्रक्रियानिराकरणात्मके तन्मतप्रतिपादिता विषयाश्चत्वारिंशदनूद्य साक्षान्निराकृताः। तत्रापि गुणगुणिनोरत्यन्तभेदप्रत्याख्यानपुरस्सरं नीलो घट इत्यादिप्रतीतेरभेदावगाहित्वं सयुक्तिकं समर्थितम्। वर्णात्मकशब्दस्य नित्यत्वे सर्वगतत्वे द्रव्यत्वे च प्रमाणान्युपदर्शितानि।

जीवेश्वरस्वरूपविलक्षणस्यान्तःकरणपरिणामविभिन्नस्य धर्मभूतज्ञानस्य नितरामप्रामाणिकत्वमुपादर्शि।

परब्रह्मणः जगदुपादानकारणत्वं निराकृत्य तन्निमित्तकारणत्वे श्रुतेस्तात्पर्यं निरूपितम्।

तन्मतसम्मतप्रपत्तिस्वरूपविमर्शनपूर्वकं केवलप्रपत्तेर्मोक्षसाधनत्वं सुकरोपायत्वं च प्रमाणविरुद्धमिति प्रपत्तिवादे नैकविधानि बाधकान्युपदर्शितानि। ब्रह्मानन्दानुभव एव मोक्ष इति वदतां तेषां प्रक्रियायाः स्वकपोलकल्पितत्वं समर्थितम्।

अर्चिरादिमार्गक्रमेण प्राप्यस्य वैकुण्ठलोकस्याण्डाद्बहिर्भूतत्वमिति रामानुजमतस्यायुक्तत्वं सुबालोपनिषद्वचनोदाहरणपूर्वकं साधितम्। मुक्तावानन्दतारतम्यस्य श्रौतत्वमुपपादितम्।

तथा "एवंकर्मब्रह्ममीमांसयोरेकप्रबन्धत्वं, अध्ययनविधेरक्षरावाप्तिपर्यन्तत्वं, श्रवणमननयोरविधेयत्वं, भ्रमस्थले पञ्चीकरणप्रक्रियया रजतादेःसत्वं, स्वाप्नपदार्थस्य बहिःसृष्टत्वं, दर्पणे मुखमित्यादौ परावृत्यग्रहणं, ब्रह्मणः तच्छरीरस्य ज्ञानानंदादीनाञ्च अत्यन्तभेदः, ब्रह्मणोऽप्यनित्यज्ञानेच्छादिसद्भावः, भगवत्प्रीतिकोपयोरेव धर्माधर्मरूपत्वं, वर्णानामुत्पत्तिविनाशौ, संसर्गाभावस्याधिकरणस्वरूपत्वं, इत्येवमादीनि तदभ्युपगतप्रमेयान्तराणि निरसनीयानि। तन्निरास-

प्रकारश्च ग्रन्थान्तरे द्रष्टव्यः” इति ग्रन्थान्त्यभागवाक्यात् रामानुजमतप्रक्रियान्तराणामपि निराकरणं एतैरेवग्रन्थकारैः ग्रन्थान्तरे कृतमित्यवगम्यते। ग्रन्थस्यास्यैकादशपरिच्छेदात्मकस्य मुद्रणपुरस्सरं प्रकाशने कालविलम्बः स्यादिति तदेकदेशो दशमः परिच्छेदः रामानुजमतनिरासात्मकोऽधुना मुद्रितः प्रकाश्यते। कारणमस्मिन् संदर्भे किञ्चित्सज्जनसमक्षमावेदयामः। “इदानीं रामानुजमतं निराक्रियते” इति शब्दश्रुतिमसहमानैः परकालमठीयैः रामानुजमतनिरासविमर्शात्मकः कश्चिदाभासमयो ग्रन्थः क्वाप्येतावत्पर्यन्तं गुहायां निलीनः श्रौतस्मार्तप्रमाणविरुद्धार्थप्रतिपादकः नित्यमुक्तनित्यनिरतिशयात्मकापरिच्छिन्नसर्वोत्तमपरमात्मानन्दसाम्यं मुक्ताल्पजीवीयानन्दस्य प्रतिपादकोऽत एव नवविधद्वेषकोटिप्रविष्टानन्दसाम्यात्मकदोषोपबृंहितद्वेषनिदानप्रक्रियापरिदूषितः करालकलिप्रभावप्रचोदितः मुद्रयित्वा प्रकटीकृतः सर्वैः साक्षात्कृतश्च। आभासमयेऽस्मिन् नवीनग्रन्थे प्राक्तनैः श्रीमद्विजयीन्द्रगुरुवरेण्यैरुद्घोषितानामपरिहार्याणां दूषणानां तदुक्तरीत्या विमर्शनं वा मात्सर्यमुत्सार्य रामानुजमतीयप्रक्रियासमर्थनं वा न क्वाप्यवलोक्यते। परन्तु तैः परकालमठीयैः दुस्सहमात्सर्यावेशवशीकृतमानसैः प्रमेयपरीक्षणचातुरीपरिभ्रष्टान्तरङ्गैः विमर्शकदार्शनिकमर्यादामुल्लङ्घ्य कर्मन्दिवृन्दोचितवाग्गाम्भीर्यमपि दूरीकृत्य अत्यन्तहेयमाध्वानां सिद्धान्ते मानबाधिते। निरासाय विचारेऽपि विरमस्वाथमन्मनः (विमर्शग्रन्थे २०३ पत्रे दृश्यते) इति, त्वद्गुरवः सर्वे भ्रान्ताः, भ्रमज्ञानस्वरूपा एव (विमर्शग्रन्थे ६ पत्रे) इति, एवं सर्वजगन्मान्यपरमपूज्यश्रीमद्राघवेन्द्रगुरुवरेण्यानां परमगुरून् प्रतिवादिमत्तमतङ्गजविध्वंसनपञ्चाननान् परतत्त्वप्रकाशिकादिशताधिकप्रौढप्रबन्धनिर्मातॄन् चतुष्षष्टिकलाकोविदान् श्रीमद्विजयीन्द्रगुरुसार्वभौमान् प्रति मृतिमेव बहुतरनरकप्रवेशोचितां प्राप्य पुनः पुनः यावदात्मभाविसंसरणभाग्भवसि इत्यलमवैदिकासन्नतरपुरस्करणतः तन्निरसनेन” (विमर्शग्रन्थे २०३ पत्रे) इत्याद्युन्मादप्रभावितवाक्यप्रयोगपूर्वकमस्मदाचार्यपरस्परादूषणमात्रसमाहितान्तरङ्गैः स्वस्वरूपानुसारिव्यापारः प्राकाशि।

परकीयाभासमयग्रन्थप्रकाशनसमनन्तरं सर्वसिद्धान्तसारासारविवेचनग्रन्थस्यैकदेशः दशमः परिच्छेदः रामानुजमतनिरासात्मकोऽयमेतावत्पर्यन्तं मुद्रणगृहप्रवेशावकाशमप्यलब्ध्वा काप्यमुद्रितसैद्धान्तिकप्रक्रियाप्रतिपादकग्रन्थसमूहमध्यप्रविष्टोऽधुना मुद्रितः प्रकाश्यते। अत्र ग्रन्थकारैः रामानुजीयप्रक्रिया सप्रमाणं प्राखण्डि। अर्वाक्तनानां पुनस्तन्मतखण्डने कर्तव्यं किञ्चिदपि नावशिष्यते। पुनरपि तन्मतनिरसनं मृतमारणन्यायमेवानुरुणद्धि। तथापि जिज्ञासुजनतत्त्वनिश्चयस्थैर्याय श्रीमद्राघवेन्द्रगुरुसार्वभौमपीठाधिष्ठितश्रीमद् भुवनेन्द्रतीर्थान्तेवासिभिः लघुगुरुप्रभाव्याख्यानिर्मातृत्वेन सुप्रसिद्धैः श्रीमदैजीस्वामिन इति विख्यातैः श्रीवेङ्कटरामाचार्यैर्विरचिते श्रीमन्न्यायामृतव्यजनाख्ये व्याख्यानग्रन्थरत्ने विशेषसमर्थनावसरे, मुक्तानन्दतारतम्यसमर्थनावसरे च रामानुजीयानां प्रक्रियायाः नितरां अप्रामाणिकत्वमुपावर्णि। तस्यापि मुद्रणपुरस्सरं प्रकाशनमावश्यकमिति संदर्भेऽस्मिन् सादरमावेदयामः।

प्रकृतेचास्मिन्ग्रन्थे प्रतिपाद्यविषयाणामनुक्रमणिका ग्रन्थाध्येतॄणां सौकर्यायादावेव दर्शिता। ग्रन्थकारैरुदाहृतानां प्रमाणानामाकरग्रन्थपङ्क्तिकाप्यन्ते समायोजिता। ग्रन्थस्यास्य संशोधनवेलायां मुद्रणसमये च संभाविताः प्रामादिकाः दोषा यद्युपलभ्येरन् ते सहृदयवरेण्यैः क्षन्तव्या इत्यभ्यर्थयामः। सारासारविवेचनग्रन्थमामूलाग्रं संपरिशील्याङ्ग्लभाषाभूमिकां विषयविमर्शनपुरस्सरमारचय्योपकृतवतां डाक्टर् बि. एन्. के. शर्मणां तथा श्रीमतां के. टि. पाण्डुरङ्गिमहोदयानां चोपकारं कदापि न विस्मरामः। हस्तलिखितप्राचीनपुस्तकप्रदानेनोपकृतवद्भ्यः श्रीमद्भ्यो राजा. गुरुराजाचार्येभ्यो धन्यवादाननन्तानर्पयामः।

अविकलमेतत्पुस्तकमुद्रणकार्यं कृतवतां प्रभामुद्रणालयाधिकारिणामुपकारं च सादरमभिनन्दामः। एतन्मुद्रणोपयुक्तप्रतिकृतिनिर्माणे संशोधनादिकर्मणि चास्मान्नियोज्य तत्त्वज्ञानप्रसारणकार्ये प्रोत्साहितवतां श्रीमद्राघवेन्द्रगुरुसार्वभौमदिव्यविद्यापीठविभ्राजमानानां निरन्तरं सच्छास्त्रप्रवचनप्रोत्साहन-

तत्पराणां प्राचीनाचार्यविरचितामुद्रितग्रन्थरत्नप्रकाशनबद्धादराणां परमपूज्यानां श्री १००८ श्रीमत्सुजयीन्द्रतीर्थगुरुवरेण्यानां परमानुग्रहविशेषं स्मारं स्मारं वारं वारं तच्चरणनलिनयोः प्रणामसन्ततिं कारं कारं श्रीमद्राघवेन्द्रगुरुसार्वभौमान्तर्गतश्रीभारतीरमणमुख्यप्राणान्तर्गतश्रीमन्मूलरामं श्रीमन्मूलगोपालकृष्णाभिन्नं भक्त्या नामं नामं विरमामोऽस्मात् वाग्विस्तरात् ।

इतिश्रीमद्राघवेन्द्रगुरुसार्वभौमचरणनलिनभृङ्गायमाणमानसाः

मागडि. यस्. रङ्गनाथाचार्याः
प्रधानसंशोधकाः

यस्. वि. भीमभट्टाः
उपसंशोधकाः

INTRODUCTION

BY

Vidyabhushana Sastranidhi Dvaitavedantarasajna Madhvamunipriya

Dr. B. N. K. SHARMA, M.A.Ph.D., D.Litt.

Retd. U. G. C. Professor, Ruparel College, Bombay.

The name of Sri Vijayindra Tirtha (C. 1517-95) stands out in the history of Madhva philosophy and its literature as the doughtiest defender of the faith against the three-pronged attacks on Madhva theology, metaphysics and interpretation of the Brahmasutras, launched by the champions of the Advaita (Vira) Saiva and Visistadvaita revivalists of the latter half of the sixteenth century, in Tamilnadu and elsewhere. Thanks to the farsightedness of his Guru Sri Vyasatirtha, he came to establish himself firmly in the heart of Tamilnadu, in Kumbakonam, as the Head of the Mutt of Surendra Tirtha, in 1542.

Within the next quarter of a century, he had successfully repulsed these attacks led by Appayya Diksita, Emme Basava and Tatacharya. The Arivilimangalam Plates of Sevappa Nayaka, the Ruler of the Tanjore Kingdom bears witness to the fact of Vijayindra Tirtha's reputation as the defender of the faith of Sri Madhvacharya against the onslaughts of the Mayavadins and others was already well-established in 1577. The grant refers to Vijayindra in the following terms :

पद्वाक्यप्रमाणज्ञशेमुषीजितवादिने ।
मध्वाचार्यमतोद्यानसञ्चरत्तरबर्हिणे ॥
मायावादिमतोच्छेदकोलाहलभरोक्तये ।
विजयीन्द्रयतीन्द्राय * * * *

A subsequent grant in 1580 by the same Ruler refers to the philosophical debates carried on at the Tanjore court by the trinity of authorities representing the three schools of Vedanta :

त्रेताग्नय इव स्पष्टं विजयीन्द्रयतीश्वरः ।
ताताचार्यो वैष्णवाग्र्यः सर्वशास्त्रविशारदः ॥
शैवाद्वैतैकसाम्राज्यः श्रीमानप्पय्यदीक्षितः ।
यत्सभायां मतं स्वं स्वं स्थापयन्तः स्थितास्त्रयः ॥

Like his contemporary Appayya Dikshita, Vijayindra is also credited with the authorship of 104 works:

चातुर्यैकाकृतियश्चतुरधिकशतग्रन्थरत्नप्रणेता

Of these, the names of nearly 52 are now known to us partly through mss. and partly through cross references in his own and others' works. Among his original works so far published are the *Bhedavidyavilasa* a refutation of Nrsinhasrama's *Bhedadhikkara*, *Upasamharavijaya* a criticism of Appayya Dikshita's *Upakrama-Parakrama*, *Saivasarvasvakhandana*, *Madhvadhvakantakoddhara* a criticism of Appayya's *Madhvamatavidhvamsana*, *Paratattvaprakasika* a criticism of Appayya's *Sivatattvaviveka*. His commentaries on the Nyayamrta and Tarkatandava of Vyasaraja await publication. His glosses on the Pramanapaddhati of Jayatirtha and on the Tattvasankhyanatika are published. He is also the author of two dramatic works the *Subhadradhananjaya* and an allegorical drama. The title Sarvatantrasvatantra borne by him is confirmed by references in several of his works. He occupied the Pitha of his mutt at Kumbhakonam for a long period of fifty-three years. He was succeeded by Sudhindra Tirtha whose successor Raghavendra Tirtha refers with very great respect and affection to Sri Vijayindra very often in his works as "Gurupada".

Like his illustrious Guru Vyasaraja, Vijayindra was a great patron of scholars regardless of their denominational allegiance. The Arivilimangalam Plates records his redistribution of the lands granted to him by Sevappa into 60 shares and their bestowal on twenty-three distinguished scholars of Veda Sastra and Darsanas belonging to different gotras and Sampradayas. For services rendered by him to the temple of Sarangapani and Chakrapani at Kumbhakonam, his Mutt still enjoys the privilege of entertaining the Utsava murtis of these temples during the Sattumurai festival, at the Mutt premises on a fixed day. He was also arbiter of the affairs of the Saiva temple of Lord Kumbhesvara in his days. The Virasaiva Matha facing the southern entrance of the Kumbhesvara temple was surrendered to Vijayindra by Emme Basava as per terms of the philosophical disputation between them in which the Saivaguru was vanquished. The whole street where the Saiva Matha stood is now known as

"Vijayindra Svami Mutt Street" in the Municipal records of Kumbhakonam.

The present work of Vijayindra is a short philosophical monograph and a critique of the main categories of the Ramanuja system and some of its theological doctrines. The treatment of the subject is fair, lucid and methodical. The author quotes from the Sribhashya and Srutaprakasa, the Tattvamuktakalapa, Adhikaranasaravali, Satadushani and Nyayaparisuddhi and other works of the Visistadvaita school. It is thus a well documented work. The spirit that animates the work is objective search for truth (tattvanveshana) and not cavil. This may be seen from the statement of the opponent's views and their analysis without passion and prejudice and the way in which Vijayindra refers in dignified language to 'Ramanujacharya' and 'Vedantacharya' in the course of his work. This is in glaring contrast with the performance of some of his critics from the Ramanuja school such as Tatacharya who attempted to reply to his criticisms. They have indulged in derisive and abusive language; Cf.

तस्मादप्रामाणिकं ध्वान्तमतानुवर्तिनामवयवत्वकल्पनम् ।

The present work opens with the examination of the ontological classification of the categories in the Ramanuja system into six and the classification of Prameyas (knowables) into Dravya and Adravya. Vijayindra objects to this classification on the ground that form, colour and such others ostensibly regarded as 'Adravya' ought in reality to be subsumed under 'Dravya' for weighty reasons of "Agaunasāmānādhikaranya-prayoga and vyavahāra. The exclusion of 'Varnātmakaśabda' from the list of Dravyas is strongly objected to. *Inter-alia*, Vijayindra raises a pertinent questions as to how Ramanujiyas can persist in regarding the Mahabhutas as the body of Brahman consistently with their position that Brahman has no Prakrtic body:

Na tasya Prākrtā mūrtih

The concept of Brahman as the material cause of the world (Jagadupadana) is also cogently refuted. Vijayindra points out that the concept of Upadanatva is bound up with actual transformation of substance (Vikārāsrayatvasyaiva upadānatvāt). He

shows the untenability of seeking support for Brahmopadanatva in Panini's Sutra "Janikartuh prakrtih". The Sutra is applicable only to cases of indubitable Upadanatva established by Pramanas and not *suo-moto* when the point is still under dispute and unestablished.

तच्छास्त्रस्य प्रमाणसिद्धोपादानोपदेयभावविषयत्वाध्यवसायात् । इदं प्रथमतया पंचम्या एव त्वया ब्रह्मण उपादानत्वे प्रमाणतयोपन्यासायोगाच्च (p. 15)

So far as we know, Vijayindra is the first to show with irrefutable arguments that the Sruti "Brahma vanam sa u vrksha asa" (Rgveda) refers to the role of Mulaprakriti as the material cause of the world,—Prakrti being donated by the term 'Brahman' as in texts like "Mama yonir mahad Brahma Tāsām brahma mahad yonir aham bijapradah pitā Tasmād etad brahma nāmarūpam annam ca jāyate" Quoting from the same Rgvedic text Vijayindra shows that the reference to the impeller (adhishtatr) of such modifications (yad adhyatishtad bhuvanani dharayan Yato dyavaprthivi nistatakshuh) leave no room for doubt that Brahman is separately mentioned as the impeller (adhishtatr) creator and supporter (dharayan) of such transformation of Prakrti. This takes the wind out of the sails of the Visistadvaita interpretation. Vijayindra goes into the grammatical details of the passage to expose the hollowness of the forced interpretation put on "Bhuvanani dharayan brahma adhyatishtat, in support of the Upadana view by treating all these terms as put in apposition.

न च त्रयाणामपि पदानां सामानाधिकरण्यमिति वाच्यम् अध्यतिष्ठदिति क्रियायाः सकर्मकत्वात्

He shows that if the Sruti Yenāsrutam Srutam bhavati and the illustrations following are not construed in terms of "Pradhanajnanad apradhanam jnataphalam bhavati", as in Madhva's interpretation, the nemesis will be the acceptance of actual transformation of Brahmasvarupa itself into the world, following the illustrations of the lump of clay and its products.

Commenting on the concept of "Dharmabhūtajnāna in Ramanuja's philosophy, Vijayindra points out that being eternal it cannot be subject to contraction and expansion at different states. In this connection, he pricks the bubble that the Sruti "Na hi drashtur drshter viparilopo vidyate" has any reference to the Jivatman's dharmabhutajnana, as supposed by Ramanuja. Vijayindra's penetrating discussion of the issue reaches its climax when he writes with inexorable logic that the acceptance of Dharmabhutajnana is a futilex appendage in Moksha (See p. 21). The bottom is knocked off for the acceptance of Dharmabhuta-jnana in the empirical state by showing that 'Vrttijnana' has its source in the mind itself and need not be attributed to Dharma-butajnana;

Mana eva vrttijnānādyupādānam

Vijayindra quotes the authority of the Sruti; Kāmah sankalpah vicikitsā dhīr bhīr ityetat sarvam mana eva for this purpose.

The most absorbing topic discussed by Vijayindra is that the place of Prapatti as an independent, quick and easy means of Moksha (laghūpāya) is untenable. While accepting the value of Prapatti, Vijayindra points out that it can never be accepted as an independent means of release, abreast of Bhakti, conceived as Upasana in Ramanuja's sense, which is hemmed in by Vihita-karmanusthāna, Sravana manana Dhyana and other disciplines based on purely Vedantic thought and injunctions. Vijayindra dismisses the plea that Prapatti is enjoined with references to the incompetent (asaktas) and Bhakti, in its Vedantic background, in respect of the Competent ones (Saktas). He points out that Rsis like Saunaka who have taught 'Nyasa' which means Prapatti according to Ramanuja, have to be classified as 'Saktas' and therefore as 'Bhaktas' could not be regarded as having intended Prapatti by that term except as contributory to Bhakti (Bhaktyangatvam eva prapatteh). In this connection Vijayindra has done a distinct service to the cause of truth by citing Ramanuja's commentary on the Caramasloka of the Gita (Sarva-dharman parityajya) held in Visistadvaita circles as the principal text of the Prapattivada where Ramanuja has tacitly admitted the untenability of the interpretation of that verse as mandatory

of Prapatti and has given us a second interpretation more consistent with the Vedantic position that such Prapatti is not an independent means of release but only as a means to intensive Bhakti. He rejects the plea that Bhakti and Prapatti can be accepted on equal terms as alternatives by resort to "Vyavasthita-vikalpa" in regard to Adhikara on the basis of 'Sakti' and 'Asakti' (p. 24). For, the concept of Adhikara is inconceivable without Sakti. Otherwise, as the kind of Sakti which qualifies for Bhakti may not be found in what qualifies for Prapatti the distinction drawn on the basis of Sakti and its absence to account for Bhakti and Prapatti will lose its point.

In the penultimate section, Vijayindra upholds the correct Vedantic position that it is Brahmasākshatkāra that is the final means of Moksha and not Bhakti transmuted as Dhyana as conceived by Ramanuja (*darsanasamanakarata*). While admitting the contention of the Visistadvaitin that Sakshatkara of Brahman is not possible thro' Sabda, Pratyaksha Dhyana or other means, Vijayindra points out that a higher form of mental perception corresponding to Yogipratyaksha is competent to confer such direct vision of Brahman. In this connection, he shows that Yogipratyaksha has been wholeheartedly admitted by Ramanuja, notwithstanding his refutation of it as conceived by the Naiyaikas in his commentary on Brahmasutra i. 1.3. Vijayindra backs this point with irrefragable quotations from the Satadushani and Nyayaparisuddhi of Vedanta Desika (p. 33)

The concluding section deals with the topic of Anandataratamya by repudiating the Visistadvaitic definition of Moksha as "Brahmānandānubhava". Vijayindra makes a strong case for Anandataratamya in Moksha following the full dress debate of the issue in the Nyayamrta of his Guru Vyasatirtha. He upholds the position of Madhva that Moksha is "Svānandānubhava" and not "Brahmānandānubhava" as the Visistadvaitins would have it. Vijayindra points out that the nature of Brahmasākshatkāra is bound to differ according to the fitness of Adhikarins in respect of the Upasana of the countless attributes of Brahman. For, the meditation of the "anantakalyanagunas" of Brahman is obviously beyond the power of ordinary mortals

Gunabhedad Vidyabhedasya angikrtatvat.

The Paramasāmyasruti in regard to Moksa does not clash with this as such Sāmya can be understood in terms of freedom from misery and other details consistent with Taratamya. Vijayindra points out that after all, even the Visistadvaitin has to rule out Sāmya of the released souls with Brahman in respect of Jagatkaranatva in deference to the ruling of the Sutrakara: Jagadvyaparavarjam and even in the Sutra "Bhogamatrasamya-lingacca" it is accepted by Ramanuja also that the expression 'matra' in 'Bhogamatra' is to be construed only in the sense of emphasis that there is similarity only in respect of the enjoyment of bliss as such and not in the entirety of such bliss with the qualitative or quantitative aspects of such bliss (Kartsnyarthatva-bhavena virodhabhavat p. 35).

Concluding, Vijayindra observes that many other peculiar positions taken by the Ramanujiyas such as the Aikasastrya view with regard to the two Mimamsas, the reality of silver presented in the illusory cognition of it on the basis of Pancikarana-prakriya, absolute difference between substance and attributes, acceptance of anityecchajnanakriya etc also in Brahman and the conception of Samsargabhava as being identical with its sub-stratum are all to be similarly examined and refuted.

The reader will agree that Vijayindra has covered a wide area of discussion of several perennial problems of philosophy and religion in the course of his compact work in a clear style with vigorous and rigorous logic and masterly marshalling of facts and evidences. He has probed deeply into the recesses of Visistadvaitic thought and literature and has brought out several fresh points which are sure to set open-minded scholars and students of Visistadvaita athinking and enable them to take a fresh look into some of the doctrines and dogmas of their school and revise them in the light of the facts placed before Parikshakas by Vijayindra Tirtha and thank him for his service to the cause of truth.

FOREWORD

BY

Darsanaratna **Prof. K. T. PANDURANGI,** M.A.
Vidwan, Siromani
Head of the Department of Sanskrit, Bangalore University

I am happy to associate myself, by way of this small introduction, with the publication of this very valuable work of Sri Vijayeendra Teertha. The present publication contains the tenth chapter of Sarvasiddhanta Sarasara Vivechana of Sri Vijayeendra Teertha. The Sarasara Vivechana is a critical review of the systems of चार्वाक, सौगत, आर्हत, पाशुपत, सांख्ययोग, न्याय-वैशेषिक, लौमारिल, व्याकरण, शाङ्कर, यादवप्रकाश, भास्कर, रामानुज and आनन्दतीर्थ. The tenth chapter of this work contains a critical review of Sri Ramanuja's Visistadvaita system. Sri Vijayeendra's style is very lucid, simple and direct. His presentation of the tenets of the system, he proposes to criticise, is very authentic. He quotes passages from the standard classics of Visistadvaita in support of his narration of their tenets (cf. passages quoted from तत्वमुक्ताकलाप, श्रीभाष्य, श्रुतप्रकाशिका, न्यायसिद्धाञ्जन, सर्वार्थसिद्धि etc., etc.) After clearly summarising their tenets he offers his frank criticism. He has critically examined the following tenets :

(1) number, nature and classification of categories set in Visistadvaita.

(2) the problem of उपादान कारणत्व of ब्रह्मन्. In this connection, he has examined the relation between उपादान and उपादेय, अवयव and अवयवी.

(3) whether प्रपत्ति is a direct means of मोक्ष. Its nature and relation with भक्ति, साक्षात्कार and ध्यान.

(4) The nature of मोक्ष. Is it ब्रह्मानन्दानुभव or स्वरूपानन्दानुभव? आनन्दतारतम्य, whether वैकुण्ठलोक is ब्रह्माण्डान्तर्गत or बहिर्भूत.

From this it is clear that he has touched, only those points that are the points of dispute between Dvaita and Visistadvaita. In reviewing other systems also he has adapted the same method. He makes it clear as follows :

यस्य यस्य मते या या प्रक्रियास्मद्विरोधिनी ।
तस्य तस्य मते सा सा पुष्कलानूद्य दूष्यते ॥

Another significant approach of this treatise is to harmonise the statements of Sri Ramanujá and his commentators in order to clearly define their own position on their tenets. This will give a clear base for a critical appraisal of their position. In this connection we may notice the following :

(1) Discussion of the relevant portions from श्रीभाष्य, श्रुतप्रकाशिका, गीताभाष्य, न्यासविंशति व्याख्यान and अधिकरणसारावली is connection with the nature and position of प्रपत्ति as a means of मोक्ष (pages 23 to 31)

(2) Discussion of ध्यान and साक्षात्कार and Sri Ramanuja's views in respect of योगिप्रत्यक्ष (pages 31 to 33)

On the main points raised in this treatise, Sri Vijayeendra's criticism may be summarised as follows :

(1) The classification of categories as द्रव्य and अद्रव्य does not hold good since the so called अद्रव्यs are not separate from द्रव्य. The number and grouping of द्रव्यs into six is also not valid since अव्याकृताकाश, वर्णात्मकशब्द etc., are also द्रव्यs which are not included here. Sri Vijayeendra rejects धर्मभूतज्ञान and नित्यविभूति that are accepted as जडद्रव्यs in Visistadvaita system (pages 5 and 6). Thus he disagrees with the very methodology of classification of categories and concepts of some of the categories that are especially accepted in that system.

(2) A major portion of this treatise is devoted to the criticism of उपादानकारणत्व of ब्रह्मन्. In Advaita, ब्रह्मन् is विवर्तोपादन, while in Visistadvita ब्रह्मन् is परिणाम्युपादान- This means that modification or विकार has to be admitted to ब्रह्मन् in some or other way. So long as the modification is confirmed to शरीर aspect only, ब्रह्मन् cannot be considered as उपादान in the true sense. Sri Vijayeendra discusses the question in detail and points out that the उपादानत्व accepted in Visistadvaita is merely पारिभाषिक that is to say assigning one's own meaning to a term and insisting on its acceptance by all without any logical ground. In the course of this discussion he has pointed out how केवलाभेद cannot be the relation between उपादान and उपादेय, अवयव and अवयवी. He has also examined the interpretation of Sruti passages such as 'सदेव सोम्येदमग्र आसीत्', 'यद्भूतयोनिम्', 'पुरुषं ब्रह्मयोनिम्', 'ब्रह्मवनं ब्रह्म'

etc., that are quoted in Visistadvaita in support of Brahmopadanatva.

(3) Sri Vijayeendra examines the concept of प्रपत्ति in detail and points out that it is either a form of भक्ति or subordinate to भक्ति. It cannot be considered as independent and direct means of मोक्ष. He also examines Sri Ramanuja's concept of ध्यान and states that by itself it is not of the form of vision or साक्षात्कार but it leads to साक्षात्कार. Even though God is अप्यक्त, his साक्षात्कार is possible.

(4) As regards the nature of मोक्ष he rejects the Visistadvaita view that it is the nature of ब्रह्मानन्दानुभव. In Advaita, जीव loses its individuality and it is not there to have its स्वरूपानन्दानुभव. But in Visistadvaita, the जीव continues to be there. Therefore the concept of मोक्ष as ब्रह्मानन्दानुभव requires reconsideration. As now described, it cannot be पुरुषार्थ. Therefore Sri Vijayeendra argues that दुःख-हेतूच्छेदविशिष्टस्वरूपानन्दाविर्भाव will be the right approach. This Visistadvaita idea of equality of muktas is also rejected and आनन्दतारतम्य is established on a correct interpretation of तैत्तिरीय passages. A very interesting question on whether वैकुण्ठ is outside ब्रह्माण्ड or inside is raised and on proper interpretation of relevant scriptural passages it is concluded that it is not outside ब्रह्माण्ड.

This small treatise is both information and dialectical. One gets a clear idea of Visistadvaita's stand on certain problems with which Dvaita differs. Volumes are written on these issues of dispute. It may not be possible for a student of historical and critical approach to go into the hair-splitting niceties of these dialectics. But a graph of the basic differences of the two approaches is very essential. This treatise helps such an understanding considerably. There is no harm if the dialecticians continue their disputations indefinitely.

संकल्पतो यस्य जगत्यनेके
मिथो विरुद्धाः समयाः प्रवृत्ताः ।

For a clear understanding of one's own school it is necessary to know the other side. This treatise is useful both to the followers of Sri Ramanuja and Sri Madhva. A general student of Indian philosophy will also benefit by this book.

॥ श्रीः ॥

सर्वसिद्धान्तसारासारविवेचनग्रन्थस्य विषयानुक्रमणिका ॥

विषयाः	पुटम्
रामानुजमतप्रक्रियानुवादः	१—३
रामानुजमतसम्मतद्रव्याद्रव्यविभागनिरासारम्भः गुणगुणिनोरत्यन्तभेदनिराकरणपूर्वकं नीलोघटइत्यादिप्रतीतेरभेदावगाहित्वसमर्थनम् ।	
वर्णात्मकशब्दस्य नित्यत्वे, सर्वगतत्वे द्रव्यत्वे च प्रमाणोपन्यासः । अव्याकृताकाशस्य द्रव्यान्तरत्वे प्रमाणप्रदर्शनम् ।	४
अन्धकारस्य द्रव्यान्तरत्वसाधनम् ।	४
क्षणलवमुहूर्ताहोरात्रपक्षमासाद्यतिरिक्ततदुपादानभूताखण्डकालस्य तदभिमतस्याप्रामाणिकत्वोपपादनम् ।	५
अन्तःकरणपरिणामातिरिक्तस्य जीवेश्वरस्वरूपविलक्षणस्य धर्मभूतज्ञानस्य सद्भावे मानाभावप्रतिपादनम् ।	५
नित्यविभूतिद्रव्यस्य तन्मतोदाहृतस्याप्रामाणिकत्वव्यवस्थापनम् । सत्त्वरजस्तमसामद्रव्यत्वनिराकरणम् । तथा रूपादीनामद्रव्यत्वप्रत्याख्यानम् । उपादानातिरिक्तोपादेयद्रव्यं नास्तीत्यस्यायुक्तत्वसाधनम् ।	६
घटाद्यवयविगतैकत्वपरीक्षा ।	६-७
प्रकृते रूपादिशून्यत्वप्रक्रियापरीक्षा ।	७-८
अवयवातिरिक्तावयव्यनङ्गीकारे बाधकोपन्यासः ।	८-९
अवयवातिरिक्तावयव्यभ्युपगमे बाधकाभावप्रतिपादनम्	१०—१२
परब्रह्मणोऽभिन्ननिमित्तोपादानत्वप्रक्रियापरीक्षा	१२—१३
ब्रह्मणः जगदुपादानत्वे साधकप्रमाणाभावप्रतिपादनम् ।	१४
ब्रह्मणः जगदुपादानकारणत्वोपपादकतया परप्रदर्शितप्रमाणानामर्थान्तरपरत्वप्रदर्शनम् ।	१४-१६

परब्रह्मणः जगदुपादानकारणत्वशंकां प्रदर्श्य तन्निराकरणम् । १७

सदेवसोम्योदमग्र आसीदिति श्रुतेः ब्रह्मणः प्रपञ्चोपादानत्वार्थकत्वं सम्भवतीति पराभिमतार्थनिरासपुरस्सरं तस्याः श्रुतेरर्थान्तरपरत्वप्रतिपादनम् । १८

येनाश्रुतं श्रुतंभवतीति श्रतिरपि ब्रह्मणः उपादानत्वं प्रतिपादयतीति पराभिमतार्थं निराकृत्य तस्याः प्रधानज्ञानेन अप्रधानं ज्ञातफलं भवतीति समीचीनार्थकथनम् । १८

यथोर्णनाभिरित्यादिश्रुतौ बहुदृष्टान्तप्रदर्शनपूर्वकं ब्रह्मणः जगदुपादानत्वं प्रतिपाद्यत इति परसम्मतार्थस्याप्रामाणिकत्वव्यवस्थापनम् । १९

चिदचिच्छरीरकं ब्रह्म जगदुपादानमित्यस्यायुक्तत्वसाधनम् । २०

"तथाहेयगुणध्वंसादवबोधादयो गुणाः ।
प्रकाश्यन्ते न जायन्ते नित्या एवात्मनो हि ते ॥"

इत्यादिस्मृतेश्च साक्षिज्ञानादिनित्यत्वप्रतिपादनपरत्वेन तदतिरिक्तधर्मभूतज्ञानप्रतिपादनपरत्वायोगव्यवस्थापनम् । जीवस्वरूपातिरिक्तस्य धर्मभूतज्ञानस्यानङ्गीकारेऽपि बाधकाभावोपपादनम् । २०—२१

मनसः वृत्तिज्ञानोपादानत्वोपपादनम् । उपादानोपादेययोः केवलमभेद इति वादस्यानुपपन्नत्वसाधनम् । २२

केवलप्रपत्तेर्मोक्षसाधनत्वनिराकरणम् । तत्र प्रमाणाभावप्रदर्शनम् । सर्वधर्मान् परित्यज्येत्यादिगीताश्लोकस्य रामानुजाचार्यैरङ्गप्रपत्तिपरत्वेन व्याख्यातत्वात्प्रपत्तेर्भक्त्यङ्गत्वाभ्युपगमात्स्वातन्त्र्येण तस्याः मोक्षासाधनत्वप्रदर्शनम् । प्रपत्तेर्मोक्षंप्रति सुकरोपायत्वप्रत्याख्यानम् । २३—२६

अदृश्यत्वाधिकरणे रामानुजभाष्यव्याख्यानभूतश्रुतप्रकाशिकायां "प्रणवो धनुःशरोह्यात्मा" इत्यादि श्रुतेः भक्तिपरत्वेन व्याख्यातत्वात्प्रपत्तिशङ्कानवकाशप्रदर्शनम् । २७

१७ ओमित्यात्मानं युञ्जीतेत्यत्र प्रपत्तिर्विधीयतइत्यस्य निराकणम्। २८

"श्रीमन्नारायणचरणौ शरणं प्रपद्ये" इत्यादिरूपे तदङ्गीकृत-
शरणागतिमन्त्रेऽपि भक्त्यङ्गप्रपत्तिरेवोच्यते नतु स्वतंत्र-
१८ प्रपत्तिरिति समर्थनम्। २९

प्रपत्तेः स्वातन्त्र्येण मोक्षसाधनत्वे अनेकबाधकोपन्यासः। ३०–३१

ध्यानरूपभक्तेः साक्षान्मोक्षसाधनत्वप्रत्याख्यानम्। ३१

१८ ब्रह्मसाक्षात्कारजनकपरीक्षा। ३१–३२

ब्रह्मसाक्षात्कारस्य मोक्षसाधनत्वप्रतिपादनम्। ३३

१९ ब्रह्मानन्दानुभवो मोक्ष इति परोक्तस्यानुपपन्नत्वव्यवस्था-
पनम्। ३४

२० दुःखहेतूच्छेदविशिष्टस्वरूपानन्दाविर्भावो मोक्ष इति पक्षे
बाधकाभावः साधकसद्भावश्चेति निगमनम्। मोक्षे
एकाकारत्वस्यायुक्तत्वसाधनम्। मोक्षे आनन्दतारतम्ये
श्रुतिवचनोपन्यासः। ३४–३५

अर्चिरादिप्राप्यो वैकुण्ठलोकोऽण्डाद्बहिर्भूत इति तन्मतस्या-
प्रामाणिकत्वोपपादनम्। सुबालोपनिषद्वचनोदाहरणम्। ३६

-२१ ब्रह्मणो मुक्तप्राप्यत्वप्रतिपादकानि मोक्षधर्मवचनानि। ३७

पाद्मोत्तरखण्डवचनानि। ३८

२२ अत्रोच्यत इत्यादिना सौबालश्रुतिवाक्यस्याशयवर्णनम्। ३९

"आदित्यवर्णं तमसस्तुपारे। आदित्यवर्णं तमसःपरस्तात्।
क्षयन्तमस्य रजसःपराके" इति श्रुतित्रयस्याभिप्राय-
प्रकाशनम्। अण्डान्तःप्रदेशे वैकुण्ठलोकप्रदेशावच्छेदेन
प्रकृतिसंबन्धराहित्यप्रतिपादनम्। ४०

२६ प्रधानपरमव्योम्नोरन्तरे विरजानदी।
तस्याः पारे परव्योम त्रिपाद्भूतिः सनातनी॥

इत्यादि पाद्मवचनानामण्डातर्गतवैकुण्ठलोकस्य प्रकृति-
२७ संबन्धराहित्यप्रतिपादनपरत्ववर्णनम्।

एवं रामानुजमतसिद्धप्रमेयान्तराणि निरसनीयानीत्युक्त्वा ग्रन्थान्तरे तन्निरासः कृत इति सूचनम्। निरसनीय रामानुजमतसिद्धप्रमेयान्तराणि ग्रन्थकारनिर्दिष्टानि यथाः—

(१) कर्मब्रह्ममीमांसयोः एकप्रबन्धत्वम्।

(२) अध्ययनविधेरक्षरावाप्तिपर्यन्तत्वम्।

(३) श्रवणमननयोरविधेयत्वम्।

(४) भ्रमस्थले पञ्चीकरणप्रक्रियया रजतादेः सत्त्वम्।

(५) स्वाप्नपदार्थस्य बहिः ब्रह्मसृष्टत्वम्।

(६) दर्पणे मुखमित्यादौ परावृत्यग्रहणम्।

(७) ब्रह्मणः तच्छरीरस्य ज्ञानानन्दादिगुणानां च अत्यन्तभेदः।

(८) ब्रह्मणोऽप्यनित्यज्ञानेच्छादिसद्भावः।

(९) भगवत्प्रीतिकोपयोरेव धर्माधर्मरूपत्वम्।

(९) वर्णानामुत्पत्तिविनाशौ।

(१०) संसर्गाभावस्याधिकरणस्वरूपत्वम्।

—इत्यादीनीति ॥ ४१

Brindavanam of
Sri Sri Vijayeendra Teertha Sripadangalavaru
KUMBHAKONAM



चतुरधिकशतग्रन्थरत्नप्रणेतारः सर्वतन्त्रस्वतन्त्राः
श्रीमद्विजयीन्द्रतीर्थगुरुसार्वभौमाः

भक्तानां मानसाम्भोजभानवे कामधेनवे ।
नमतां कल्पतरवे जयीन्द्रगुरवे नमः ॥

|| श्रीः ||

श्रीमद्विजयीन्द्रतीर्थविरचितं

सर्वसिद्धान्तसारासारविवेचनम्

मङ्गलम्

मह्यं प्रदद्यादनिशं मुकुन्दस्तत्वावबोधं सकलार्थदर्शी ।
सङ्कल्पतो यस्य जगत्यनेके मिथोविरुद्धाः समयाः प्रवृत्ताः || १ ||

सर्वतन्त्रस्वतन्त्रेण विजयीन्द्राख्यभिक्षुणा ।
क्रियते सर्वसिद्धान्तसारासारविवेचनम् || २ ||

मिथ्याज्ञाननिमित्तोऽयं बन्धस्तत्त्वधियं विना ।
न शाम्यतीति युक्तं तत्सारासारविवेचनम् || ३ ||

यस्य यस्य मते या या प्रक्रियास्मद्विरोधिनी ।
तस्य तस्य मते सा सा पुष्कलानूद्य दूष्यते || ४ ||

तत्र रामानुजश्रीकण्ठमतनिरासो नाम दशमः परिच्छेदः ||

इदानीं रामानुजमतं निराक्रियते । रामानुजमतानुवर्तिनो ह्येवमाहुः । प्रमाविषयः प्रमेयम् । प्रमाणस्यापि प्रमेयत्वान्न पृथक् परिगणनम् । तच्च द्विविधम् । द्रव्यमद्रव्यञ्चेति । द्रव्यं च द्विविधम् । जडमजडं चेति । जडं च द्विविधम् । प्रकृतिः कालश्चेति । अजडमपि द्विविधम् । प्रत्यक् पराक् चेति । प्रत्यक् द्विविधः । जीव ईश्वरश्चेति । पराक् च द्विविधम्[1] । धर्मभूतज्ञानं नित्यविभूतिश्चेति । एवञ्च प्रकृतिः, कालः, जीवः, ईश्वरः, धर्मभूतज्ञानं, नित्यविभूतिरिति द्रव्यं षड्विधम् । तत्र द्रव्यत्वमवस्थायोगित्वम् ।

---

1. द्विविधा इति पाठः.

अवस्था च आगन्तुको धर्मः। सत्वादिगुणोपेता प्रकृतिः। सा च महदहङ्कार-कादशेन्द्रियपञ्चतन्मात्रपञ्चमहाभूताद्यवस्थायोगितया प्रकृतित्वावस्थायोगितया च चतुर्विंशतिधा। तत्र क्षणलवमुहूर्तसंवत्सराद्यवस्थायुक्तः कालः। अणुत्वे सति ज्ञातृत्वं जीवत्वम्। जीवान्यचेतनत्वं ईश्वरत्वम्। ज्ञातुर्ज्ञेयविषयावभासो धर्मभूतज्ञानम्। त्रिगुणद्रव्यभिन्ना सत्वगुणोपेता नित्यविभूतिरिति ॥ यथाहुः ॥

द्रव्याद्रव्यप्रभेदान्मतमुभयविधं तद्विदस्तत्त्वमाहुः
द्रव्यं द्वेधा विभक्तं जडमजडमिति प्राच्यमव्यक्तकालौ।
अन्त्यं प्रत्यक् पराक् च प्रथममुभयथा तत्र जीवेशभेदात्
नित्या भूतिर्मतिश्चेत्यपरमपि जडामादिमां केचिदाहुः ॥

(तत्त्वमुक्ताकलापे जडद्रव्यसरे ६ श्लोकः)

तत्र द्रव्यं दशावत् प्रकृतिरिहगुणैः सत्त्वपूर्वैरुपेता
कालोऽब्दाद्याकृतिस्स्यात् अणुरवगतिमान् जीवईशोऽन्य आत्मा।
संप्रोक्ता नित्यभूतिस्त्रिगुणसमधिका सत्त्वयुक्ता तथैव
ज्ञातुर्ज्ञेयावभासो मतिरितिकथितं संग्रहाद्द्रव्यलक्ष्म ॥

(तत्त्वमुक्ताकलापे जडद्रव्यसरे ७ श्लोकः) इति ॥

संयोगरहितमद्रव्यमनुपादानं वा। तच्च दशविधम्। सत्वरजस्तमांसि शब्दस्पर्शरूपरसगन्धाः संयोगः शक्तिरिति। एवं सिद्धेष्वेवाद्रव्येषु गुरुत्व-द्रवत्वस्नेहसंस्कारसंख्यापरिमाणपृथक्त्वविभागपरत्वापरत्वसामान्यसादृश्यविशेषसम-वायाभाववैशिष्ट्यादीनां यथासम्भवमन्तर्भावः। स च न्यायसिद्धाञ्जने सर्वार्थ-सिद्धौ च द्रष्टव्यः ॥ तत्रापि कारणस्यैव अवस्थान्तरयोगित्वेन कार्यत्वम्, न तु कारणात् कार्यद्रव्यं भिन्नम्। तदनन्यत्वाधिकरणे तयोरनन्यत्व-समर्थनात्। न चैवं कारकव्यापारवैयर्थ्यम्। अवस्थायाः आगन्तुकत्वाभ्यु-पगमेन तदर्थतया कारकव्यापारावश्यंभावात्। नचैवमसत्कार्यवादापत्तिः। सतो विद्यमानस्य उपादानस्यैव अवस्थायोगित्वेन कार्यत्वमिति सत्कार्यवाद-

शब्दार्थत्वात् । अविद्यमानद्रव्यान्तरोत्पत्तिवादस्यैव असत्कार्यवादशब्दार्थत्वात् । तस्यैव मया निषेधात् । सांख्याभिमतसत्कार्यवादस्य अस्माभिरनभ्युपगमाच्च । जगद्रूपकार्योपादानं च ब्रह्मैव । तत्र कर्तृत्ववदुपादानत्वस्यापि प्रमाणसिद्धत्वात् । जीवब्रह्मणोश्चात्यन्तभेदः । तदभेदश्रुतयस्तु शरीरशरीरिभावनिबन्धनाः । ब्रह्मज्ञानमेव मोक्षोपायः । तच्च द्विविधम् । भक्तिरूपं प्रपत्तिरूपं चेति, तत्र भक्तिर्नाम तैलधारावदविच्छिन्ना दर्शनसमानाकारा निरतिशयप्रीतिरूपा आप्रायणमनुवर्तमाना स्मृतिसन्ततिः । तद्यथा

प्रारब्धेतरपूर्वपापमखिलं प्रामादिकं चोत्तर-
न्यासेन क्षपयन्ननभ्युपगतप्रारब्धखण्डं च नः ।
धीपूर्वोत्तरपाप्मनामजननाज्जातेऽपि तन्निष्कृतेः
कौटिल्ये सति शिक्षयन्ननघयन् क्रोडीकरोति प्रभुः ॥ इति ॥

प्रपत्तिस्तु ईश्वरं प्रति त्वमेवोपायभूतो भवेति प्रार्थनारूपो ज्ञानविशेषः । सा च सकृदनुष्ठितैव मोक्षसाधनम् । न चैवं सद्यो मोक्षप्रसङ्गः । प्रपत्त्या प्रारब्धस्यापि विनाश इत्यभ्युपगमादिति वाच्यम् । अनभ्युपगतप्रारब्धस्य नाशाभ्युपगमेऽपि अभ्युपगतप्रारब्धस्य प्रपत्त्यविनाश्यस्य सत्त्वेन तदभावोपपत्तेः ॥

यथाहुः ॥ प्रारब्धेतरेत्यादिना । मोक्षश्च नित्यनिरतिशयब्रह्मानन्दावाप्तिरूपः, न तु दुःखहेतूच्छेदरूपः, तावन्मात्रस्य अपुरुषार्थत्वादिति ॥

अत्रोच्यते ॥ न तावद्द्रव्याद्रव्यविभागो युक्तः । अद्रव्यत्वेनाभिमतानां रूपादीनां तदाश्रयद्रव्याणां च अभिन्नत्वात् । नीलो घट इत्यादिप्रतीत्या तदभेदस्यावश्याङ्गीकर्तव्यत्वात् । न हि भेदे सामानाधिकरण्यप्रतीतिः दृष्टचरी । सिंहो माणवक इति सामानाधिकरण्यं दृश्यत इति चेन्न । तत्र तथा प्रयोगस्य गौणत्वात् । नीलो घटः इत्यादौ गौणत्वव्यवहाराभावात् । न च नीलादिशब्दस्य नीलादिमत्परत्वं, प्रतीतिव्याख्यानापातात् । नियमेन तथा प्रयोगदर्शनेन अभेदपरत्वस्यैव युक्तत्वाच्च । किञ्च द्रव्यं षड्विधमित्ययुक्तम् । वर्णात्मकशब्दादेः

द्रव्यान्तरस्य सत्वात् । यस्य वेदाः शरीरमिति वेदानां ब्रह्मशरीरत्वोक्त्या द्रव्यत्वसिद्धेः । त्वन्मते अद्रव्यस्य शरीरत्वायोगात् । न च तेषां शरीरत्वं गौणम् । पृथिव्यादीनामपि तथात्वापातात् । तस्य प्रकृतिलीनस्येत्यत्र सर्ववेद-प्रकृतिरोङ्कारः, तस्य च प्रकृतिरकार इत्याद्यर्थं वदता त्वया वर्णेष्वपि द्रव्यत्वस्याभ्युपगन्तव्यत्वाच्च । न च तत्र प्रकृतिशब्दितोपादानत्वं गौणमिति वाच्यम् । मायान्त्वित्यादावपि तथात्वापातात् ॥

वस्तुतस्तु ॥ वर्णात्मकशब्दानां नित्यसर्वगतत्वेन द्रव्यत्वं दुर्वारम् । वाचा विरूपनित्यया, यावद्ब्रह्मविष्ठितं तावती वाक् इत्यादिश्रुतेः ॥ किञ्चाव्याकृताकाशस्य द्रव्यान्तरस्य सत्वात्त्वदुक्तसंख्याऽयोगः । न च तत्र मानाभावः । यावान्वायमाकाशः तावानेषोऽन्तर्हृदय आकाशः । आकाशवत् सर्वगतश्च नित्यः । स यथानन्तरोऽयमाकाशः एवमनन्त आत्मा वेदितव्यः इत्यादिश्रुतीनां सत्वात् । न च तत्राकाशशब्दः परमात्मपरः । उपमानोपमेयभावस्य भेदनियतत्वात् । न च गगनं गगनाकारमित्यादौ व्यभिचारः । तत्र सदृशान्तरव्यवच्छेदपरत्वेन सादृश्यपरत्वासिद्धेः । नचात्रापि तथास्त्विति युक्तम् । स्वरससिद्धसादृश्यपरत्वत्यागायोगात् । न चैवं त्वन्मते आकाशाधिकरणे अनन्तत्वादिलिङ्गेन आकाशादेवेति वाक्यस्य विष्णुपरत्वसाधनमयुक्तं स्यात् । अनन्तत्वस्याव्याकृताकाशेऽपि सत्वादिति वाच्यम् । गुणतोऽप्यानन्त्यस्य अनन्तशब्दार्थत्वेन तेन तस्य विष्णुपरत्वनिर्णयसम्भवात् । परोवरीयस्त्वादिधर्मान्तरेणास्य विष्णुपरत्वसिद्धेश्चेति यत्किञ्चिदेतत् ॥

किञ्च त्वया अन्धकारस्य द्रव्यस्योपगमात्कथं प्रकृतिकालजीवेश्वरधर्मभूतज्ञाननित्यविभूतिभेदेन द्रव्यं षड्विधमित्युक्तिः । न तावत्त्वन्मतेऽन्धकारस्य प्रकृतिद्रव्यरूपत्वम् । साम्यावस्थायां त्वया प्रकृतिद्रव्यस्य अचाक्षुषत्वोपगमात् । अन्धकारस्य चाक्षुषत्वोपगमाच्च ॥ नापि प्रकृत्यवस्थारूपत्वम् । महदहङ्कारेन्द्रियतन्मात्रभूतानामेव प्रकृत्यवस्थारूपत्वोपगमात् । अन्धकारस्य प्रकृत्य-

वस्थान्तरत्वे 'चतुर्विंशतिसंख्यातमव्यक्तं व्यक्तमुच्यते' इति श्रुतिविरोधः। महदहङ्कारेन्द्रियतन्मात्रेषु अन्तर्भावे चाक्षुषत्वमनुपपन्नम्। त्वन्मते तेषामचाक्षुषत्वोपगमात्। 'स्वच्छन्देनागमेन प्रकृतिमहदहङ्कारमात्राक्षसिद्धिः। नाध्यक्षेणाप्रतीतेः न पुनरनुमया, व्याप्तिलिङ्गाद्यसिद्धे'रिति त्वदुक्तेः। त. मु. क. ११.। नचाकाशेऽन्तर्भावः। आकाशे विद्यमान एव सौरालोकादिनान्धकारस्य नाशदर्शनेन तद्रूपत्वायोगात्। नापि वायुरूपत्वम्। चाक्षुषत्वात्। नापि तेजोरूपत्वम्। तद्विरुद्धस्वभावत्वात्। नापि जलरूपत्वम्। नीलरूपाश्रयत्वात्। न च पृथिवीरूपत्वम्। निस्स्पर्शत्वात्। न च नीलप्रभासहचरितनीलभागादिवन्निःस्पर्शत्वेऽप्यन्धकारस्य पृथिवीस्वरूपत्वं युक्तमिति वाच्यम्। प्रभायामेव नैल्यसम्भवेन तादृशनीलभागानां अकल्पनीयत्वात्। न चैवं यत्कृष्णं तदन्नस्येति श्रुतिविरोधः। अन्धकारे पृथिवीवैलक्षण्यस्य प्रबलप्रमाणसिद्धत्वेन तच्छ्रुतेरन्धकारव्यतिरिक्तविषयत्वेन सङ्कोचनीयत्वात्। तस्मादन्धकारस्य द्रव्यान्तरत्वं अवश्यमभ्युपेयम्॥

किञ्च क्षणलवमुहूर्ताहोरात्रपक्षमासर्तुसंवत्सरादिसूक्ष्मकालव्यतिरेकेण तदुपादानभूतोऽखण्डः कालः नाभ्युपेयः प्रमाणाभावात्। न च 'कालस्वभावो नियति'रित्यादिश्रुत्या तत्सिद्धिः। सूक्ष्मकालविषयत्वेनापि तदुपपत्तेः। न च "नदीवप्रभवात् काचित् अक्षय्यात्स्यन्दते यथा। तां नद्योऽभिसमायन्ति सोरुस्सती न निवर्तते॥ एवं नानासमुत्थानाः कालाः संवत्सरं श्रिताः। अणुशश्च महशश्च। सर्वे समवयन्त्रितम्॥ स तैस्सर्वैः समाविष्टः उरुस्सन्न निवर्तते॥' इत्यादिश्रुत्या क्षणलवाद्युपादानभूताखण्डकालसिद्धिरिति वाच्यम्। तच्छ्रुतेः कालप्रवाहाविच्छेदपरत्वेन त्वदभिमतेऽखण्डकाले प्रमाणत्वायोगात्॥

किञ्च धर्मभूतज्ञानशब्देन अन्तःकरणपरिणामरूपवृत्तिज्ञानोक्तौ तस्य प्राकृतत्वेन द्रव्यान्तरत्वायोगः। तद्व्यतिरिक्तं जीवेश्वरस्वरूपातिरिक्तं नित्यज्ञानं च नास्त्येव मानाभावात्। यथा चैतत् तथाग्रे प्रतिपादयिष्यते। किञ्च

नित्यविभूतिद्रव्यमप्रामाणिकम् । देशमात्रस्य मूलप्रकृतिव्याप्यत्वात् । 'तमसः परस्ता'दित्यादेश्च ब्रह्मणः प्रकृत्यवश्यत्वप्रतिपादनपरत्वादित्युक्तम् । किञ्च सत्त्वं खल्वीरितं विषमत्वं प्रयाति । रजःखल्वीरितं विषमत्वं प्रयाति । तमःखल्वीरितं विषमत्वं प्रयातीति सत्त्वरजस्तमसामपीश्वरप्रेर्यत्वावस्थायोगित्वयोः प्रतिपादनेन द्रव्यत्वं दुर्वारम् ॥ किञ्च सत्वरजस्तमसामद्रव्यत्वमयुक्तम् । उदाहृतश्रुत्यनुसारेण तेषामपीश्वरप्रेर्यत्वेन द्रव्यत्त्वावश्यंभावात् । "ससर्ज भगवानादौ त्रीन् गुणान् प्रकृतेः परः" । इत्युक्तप्रकारेण तेषां प्राथमिकप्रकृतिकार्यत्वस्याङ्गीकर्तव्यत्वाच्च ॥ किञ्च रूपादीनामद्रव्यत्वोक्तिरयुक्ता । तेषां द्रव्याभिन्नत्वस्य उक्तत्वात् । ध्वन्यात्मकशब्दानां अद्रव्यत्वेऽपि वर्णात्मकशब्दानां द्रव्यत्वस्योपपादिततया तेषामद्रव्येषु परिगणनायोगाच्चेति दिक् ॥

किञ्च उपादानातिरिक्तं उपादेयद्रव्यं नास्तीत्ययुक्तम् । तथाहि । न तावदुपादानातिरिक्तोपादेयद्रव्यसद्भावे मानाभावः । प्रत्यक्षस्यैव प्रमाणत्वात् । अस्ति तावत् स्थूलं नीलमेकं घटं साक्षात्करोमीति प्रतीतिः । न चैवंभूतसूक्ष्मेषु अनुद्भूतरूपेषु अनेकेषु अतीन्द्रियेषु भवितुमर्हति । न वा नीरूपायामतीन्द्रियायां प्रकृतौ । न च घटादिकं प्रति कपालादीनामेवोपादानत्वेन तेषां च स्थूलत्वाद्रूपवत्त्वाद्योग्यत्वाच्च घटादेः न साक्षात्कारानुपपत्तिरिति वाच्यम् । कपालादीनामपि कार्यतया तेषामपि मूलकारणप्रकृतिरूपत्वाभ्युपगमेन उक्तदोषानिस्तारात् । परिणामवादे कपालादीनां घटाद्युपादानत्वाभ्युपगमायोगाच्च । एकत्वप्रतीत्यनुपपादनाच्च । न च सूक्ष्माणामेव हिमादीनां सङ्घातत्त्वावस्थायां ऐन्द्रियकत्वं दृश्यत इति वाच्यम् । तत्र सङ्घातस्य द्रव्यान्तरत्वोपगमात् । अन्यथा तत्राप्युक्तदोषप्रसञ्जनात् ॥ किञ्च घटादिषु वनसेनादिष्विव नैकत्वमौपाधिकम् । एकदेशस्थत्वप्रतीतिं विनापि घटादावेकत्वानुभवात् । त्वन्मते प्रकृतिपरमात्मकालाद्यतिरिक्तपृथिव्यादिदेशानामप्यनेकत्वेन तदेकत्वेन वनाद्येकत्वोपपादनायोगाच्च । न च प्रकृतिगतैकत्वोपाधिकं घटाद्येकत्वमिति वाच्यम् । त्वन्मते घटादीनां प्रकृत्यनतिरिक्तत्वेन प्रकृतेश्चातीन्द्रियत्वेन साक्षात्क्रियमाणघटादिगतैक-

त्वस्य प्रकृतिगतैकत्वोपाधिकत्वायोगात् । एतेन परमात्मकालाद्युपाधिकं घटादिगतमेकत्वमिति निरस्तम् । तयोरप्यतीन्द्रियत्वात् । न च कालस्य प्रत्यक्षत्वोपगमेन तदेकत्वोपाधिकं घटाद्येकत्वमिति वाच्यम् । कालप्रतीतिं विनापि घटादावेकत्वप्रतीतेः सर्वानुभवसिद्धत्वात् । किञ्च त्वन्मते प्रकृतेः एकत्वेन महदहङ्कारेन्द्रियतन्मात्रभूतादीनां प्रकृतिकार्यभूतानां अनेकेषां प्रकृतेः परस्परं च भिन्नत्वावश्यंभावेन उपादेयद्रव्यान्तरं दुर्वारम् । न च एकस्याः एव प्रकृतेः अनेकत्वमभ्युपगम्यत इति न द्रव्यान्तरसिद्धिरिति वाच्यम् । तथात्वे प्रकृतेरेकत्वाभावप्रसङ्गात । त्वया एकत्वानेकत्वयोः विरोधाभ्युपगमाच्च । न च तयोरेककाल एव विरोधः । न तु कालान्तरेऽपि । एकस्यैव मृत्कूटस्य घटशरावाद्यवस्थायां अनेकत्वदर्शनादिति वाच्यम् । मृत्कूटस्यांशप्रयुक्तानेकत्वस्यापि सत्वेन तस्य अनेकात्मकत्वस्य युक्तत्वेऽपि त्वन्मते प्रकृतेः निरंशत्वेन महदाद्यनेकात्मकत्वस्यायुक्तत्वात् । न हि निरंशस्य एकस्यानेकत्वं क्वचिद्दृष्टचरम् । किञ्च वियदनिलतेजोबन्नादिषु भूतेषु घटशरीरादिभौतिकेषु च परस्परसंयोगादीनां अवच्छेदकभेदादीनां च दृष्टत्वेन निरंशैकप्रकृतौ तदयोगेन वियदादिकार्यद्रव्यान्तरं दुर्वारम् । नन्वेतद्दोषा[1] भावाय प्रकृतेः सांशत्वमभ्युपगम्यत इति चेत्तर्ह्येकोपादानवादत्यागप्रसङ्गात् । परमाणुकारणवादाविशेषप्रसङ्गाच्च । न च सङ्घातोपाधिकमेकत्वमनेकेष्वपि युज्यते । प्रकृत्यंशानां रूपादिशून्यत्वेन अत्यन्तविजातीयत्वाभावेन च परमाणुकारणवादाद्विशेषश्चेति वाच्यम् । अजामेकां लोहितशुक्लकृष्णां, अजाह्येका भोक्तृभोगार्थयुक्तेति प्रकृतेः साक्षादेकत्वप्रतिपादकश्रुतिविरोधात् । मायान्तु प्रकृतिं विद्यात्, गौरनाद्यन्तवती सा, क्षरं प्रधानममृताक्षरं हर इत्यादिश्रुतिगतैकवचनविरोधाच्च । अन्यथा एकमेवाद्वितीयं, द्यावाभूमी जनयन् देव एकः, इत्यादावपि सङ्घातोपाधिकमेकत्वमिति स्यात् । "ननु 'चतुर्विंशतिसंख्याकमव्यक्तं व्यक्तमुच्यते । अष्टौ प्रकृतयः । षोडश विकाराः । 'भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च । अहङ्कार इतीयं

---

1. एतद्दोषपरिजिहीर्षयेति पाठः

मे भिन्ना प्रकृतिरष्टधा ॥ महान्तं च समावृत्य प्रधानं समवस्थितम् । अनन्तस्य न तस्यान्तः संख्यानं वापि विद्यते ॥ प्रोच्यते प्रकृतिः सूक्ष्मा नित्या सदसदात्मिका ॥' इत्यादिश्रुतिस्मृतिभिः प्रकृतेरनेकात्मत्वप्रतिपादनात्तदेकत्वप्रतिपादकश्रुतेः सङ्घातैकत्वप्रतिपादनपरत्वमेव युक्तम् । एकमेवाद्वितीयमित्यादेस्तु बाधकाभावेन न तत्समश्चेत्यादिश्रुत्यन्तरानुसारेण च व्यक्त्यैक्यपरत्वमेव अभ्युपगम्यत" इति चेदेवमपि प्रकृत्यंशानां त्वन्मते नीरूपत्वेन सूक्ष्मत्वेन च प्रत्यक्षाविषयतया साक्षात्क्रियमाणानां भूतानां भौतिकानां च उपादानभूतप्रकृतेः भिन्नत्वस्य दुर्वारत्वात् । ननु प्रकृत्यंशानां तेजोऽबन्नशरीरघटादिभूतभौतिकाद्यवस्थायां तत्तत्प्राण्यदृष्टवशात् रूपाद्युत्पत्तेः तेषामेवावस्थान्तरे रूपादिमत्त्वेन प्रत्यक्षत्वं युक्तमिति न द्रव्यान्तरोत्पत्तिः युक्तेति चेन्न । तथा सति जीवब्रह्मणोरपि विरुद्धधर्मयोगित्वेन भेदसिध्यभावप्रसङ्गात् ॥ किञ्च त्वन्मते प्राकृततमःप्रकाशादावपि धर्ममात्रप्रयुक्त एव विरोधः स्यान्नतु परस्परानात्मकतालक्षणो विरोधः । न च प्रकृतावंशभेदाभ्युपगमात् तत्र धर्मिप्रयुक्तो विरोधोऽस्तीति वाच्यम् । तथा सति प्रकृतेः प्राकृतानां तेजोऽबन्नादीनां च नीरूपत्वरूपवत्त्वाभ्यां भेदावश्यंभावेन तेषां धर्मिप्रयुक्तो विरोधः आवश्यक इति द्रव्यान्तरत्वस्य वज्रलेपत्वात् । न च प्रकृते रूपवत्त्वं त्वया अभ्युपगम्यते । "शब्दस्पर्शविहीनं तद्रूपादिभिरसंहितम् । प्रधानं तज्जगद्योनिरनादिप्रभवाप्ययम्" ॥ इत्यादिस्मृत्यनुसारेण प्रकृतेः त्वया रूपादिशून्यत्वोपगमात् । प्रकृत्यंशानां रूपादिशून्यत्वेनैवाणुकारणवादवैलक्षण्योपगमाच्च । अजामेकां लोहितशुक्लकृष्णां, गौरनाद्यनन्तवती सा जनित्री भूतभाविनी । सिताऽसिता च रक्ताचेत्यादिश्रुतेश्च तेजोऽबन्नादिरूपेण परिणता लोहितशुक्लकृष्णाकारावतिष्ठते इति त्वयैवार्थान्तराभ्युपगमेन तथा प्रकृते रूपवत्त्वासिद्धेश्च ॥

किञ्च अवयवातिरिक्तावयव्यनङ्गीकारे घटोऽयं पटोऽयं वृक्षोऽयमित्यादिप्रत्यक्षप्रत्ययाः निरालम्बनाः स्युः । त्वन्मते तत्तदवयवानां सर्वेषामपि संहतत्वावस्थायामपि न घटपटवृक्षादिप्रतीतिः । कपालतन्तुरूपत्वोपगमात् । तावता-

मवयवानां इन्द्रियसन्निकर्षाभावात् । तथाच घटपटवृक्षाद्येकदेशप्रत्यक्षप्रतीतिरेव स्यान्न घटपटवृक्षादिप्रतीतिः । नहि कपालतन्तुशाखाद्येकदेशमात्रं घटः पटो वृक्ष इत्यङ्गीकर्तुं युक्तम् । तथा व्यवहाराभावात् । न चार्वाग्भागावस्थितानां अवयवानां उपनये घटोऽयमित्यादिप्रत्यक्षमिति वाच्यम् । नियमेनोपनायक-सामग्र्यभावात्, एकदेशसन्निकर्षरूपप्रत्यक्षसामग्र्या बलवत्त्वाच्च । अतिरिक्ता-वयव्यभ्युपगमे तु तत्तदवयवावच्छेदेन तत्तदवयविनः सन्निकृष्टत्वेन घटपटादि-प्रत्यक्षप्रतीत्युपपत्तिः ॥

नन्ववयवातिरिक्तावयव्यभ्युपगमे अवयवगतगुरुत्वातिरेकेण अवयविन्यपि गुरुत्वान्तरं स्यात् । कारणगुणा हि कार्ये गुणानारभन्त इत्यभ्युपगमात् । अन्यथा अवयविष्वपि रूपादिकमन्यन्नोत्पद्येत । अवयविनः प्रत्यक्षत्वेन तत्र रूपाद्युत्पत्त्यङ्गीकारे तत्र पतनादिकार्यदर्शनेन गुरुत्वान्तरमपि स्यात् । तत्रावयविनोऽवयवगतगुरुत्वादेव पतनं चेदवयवगतरूपादिनैव अवयविनः प्रत्यक्षत्वेन रूपादिकमपि तत्र नाङ्गीकार्यं स्यात् । न च यद्विषयो यत्साक्षात्कारः तद्गतरूपादिरेव तत्साक्षात्कारे प्रयोजक इति वाच्यम् । तर्हि पतनसमानाधिकरणमवयविगुरुत्वमपि तथा स्यात् । अन्यनिष्ठगुरुत्वस्य अन्यदीयपतनाहेतुत्वात् । न चावयवानामेव गुरुत्वात् पतनं, अवयविनस्तु शिलाद्याबद्धतृणादिपतनवत्तत्सम्बन्धिप्रयुक्तमिति वाच्यम् । अवयवपतनमपि स्वावयवगुरुत्वात्, तद्गुरुत्वमपि तथेति परमाणुमात्रगुरुत्वपरिशेषप्रसङ्गः । तथाच कार्यगुरुत्वात् कारणगुरुत्वमिति त्वदभ्युपगमविरोधः । अवयविगतगुरुत्वोपलम्भ-नाद्यर्थमेव तोलनादौ प्रवृत्तिदर्शनात् तद्विरोधश्च स्यात् ।

किञ्च संयोगवेगप्रयत्नाभावे गुरुत्वात् पतनम्, आद्यपतनासमवायि-कारणं गुरुत्वमिति त्वदभ्युपगमविरोधः । एवं गुरुत्वान्तरवद्रूपरसगन्धाद्यन्तरमपि स्यादित्युपादानातिरिक्तमुपादेयं द्रव्यान्तरं नाभ्युपेयमिति ॥ मैवम् । तन्तवः पट इत्यपर्यायशब्दभेदैरेकत्वद्वित्वादिसंख्याभेदैः तत्तदर्थक्रियाभेदैः वृत्तचतुरश्रत्वाद्या-

कारभेदैः पूर्वोत्तरकालभेदैः कारणभेदैश्च कार्यकारणयोः भेदसिद्धौ गुरुत्वान्तराभावस्य कार्यगुरुत्वेन कारणगतगुरुत्वस्य नाशः, प्रतिबन्धो वेति यथाकथञ्चित् उपपादनीयत्वात् । अन्यथा जीवेश्वराव्यक्तकालादीनामपि विरुद्धगुणयोगित्वेन भेदो न स्यादित्युक्तम् । न च मृदेव घटः, आतानवितानात्मकास्तन्तव एव पट इति सामानाधिकरण्येन कार्यकारणयोः ऐक्यमेवानुभूयत इति वाच्यम् । चन्दनं सुखमित्यादिसामानाधिकरण्यवत् तस्यौपचारिकत्वात् । न च पत्रताटङ्कयोः अप्यभेदाभ्युपगमः । परिणामभेदे द्रव्यभेदावश्यंभावात् । अन्यथा योऽहं बाल्ये पितरावन्वभूवम्, सएवाहमिदानीं स्थाविरे प्रणप्तॄननुभवामीति प्रत्यभिज्ञायाः युवस्थविराभेदविषयकत्वेन तया देहातिरिक्तात्मसिध्यभावप्रसङ्गात् । न च श्रुत्यैव देहातिरिक्तात्मसिद्धिरिति वाच्यम् । तस्या अपि प्रामाणिकग्रन्थेषु प्रमाणत्वेन उपन्यासात् । विप्रतिपन्नं प्रति प्रमाणान्तरस्यैव उपन्यसनीयत्वाच्च । न च पत्रस्य एकत्वेन ताटङ्कानारम्भः शङ्कनीयः । अंशभेदेन तस्यैवारम्भकत्वोपपत्तेः । न चावयवातिरिक्तावयव्यभ्युपगमे कपालाद्येकैकावयवसंयुक्त एव भूतले अवयविनो घटादेरप्यवस्थितिर्वाच्या । अन्यथा भूतले घट इति प्रतीतिः निरालम्बा स्यात् । नचासौ युक्ता, कपालघटयोः कठिनद्रव्ययोः समानदेशत्वायोगात् । कठिनद्रव्याणां समानदेशताविरोधाभ्युपगमादिति वाच्यम् । अपृथक्सिद्धयोः कठिनद्रव्यत्वेऽपि समानदेशत्वाभ्युपगमे विरोधाभावात् । यथादर्शनं विरोधाविरोधयोरभ्युपगन्तव्यत्वात् । अन्यथा द्रव्याणामेव समानदेशतामङ्गीकृत्य सर्वमपि द्रव्यं नियतैकदेशवृत्तीति अभ्युपगन्तव्यं स्यात् । न चैतद्युक्तं, व्यापकद्रव्याणामपि केषाञ्चित्प्रमाणप्रतिपन्नत्वात्, एवं अपृथक्सिद्धयोः अपि कठिनद्रव्ययोः समानदेशत्वं प्रमाणप्रतिपन्नमिति पृथक्सिद्धयोरेव कठिनद्रव्ययोः समानदेशत्वविरोधोऽभ्युपगन्तव्य इति न कश्चिद्दोषः ॥

ननु कार्यकारणद्रव्ययोः गवाश्वयोरिव भेदबुध्यभावात् सम्बन्धाभावाच्चैकत्वमङ्गीकर्तव्यम् । तथाहि, न तावत्कार्यकारणयोः संयोगः सम्बन्धः

अनभ्युपगमात्। नापि समवायः। प्रमाणाभावात्। तस्य विशिष्टधीकल्प्यत्वात्। मृद्घटादीनां च भेदबुद्ध्यभावात्। न च मृदि घटः, इह तन्तुषु पटः इति च तद्भेदबुद्धिरिति युक्तम्। एतादृशबुद्धेः त्वदेककल्पितत्वेनासार्वत्रिकत्वात्। किञ्च समवायस्य समवायिभिः सम्बन्धान्तरं कल्प्यम्। एवं तत्र तत्रेत्यनवस्था। अथ समवायस्य समवायिभिः न सम्बन्धान्तरं, तर्हि कार्यकारणयोः अपि तथास्तु। एवं कार्यकारणयोः विशिष्टबुद्ध्यभावात् अभेदबुद्धेश्च एकत्वमङ्गीकर्तव्यम्। मैवम्। मृदा घट उत्पन्नः, तन्तुभिः पट उत्पन्न इति तत्रापि भेदबुद्धेस्सत्वात्। पटस्य तन्तव इति विशिष्टधीसत्वाच्च। एवं च कार्यकारणयोः सम्बन्धो दुर्वारः। स च संयोगो न भवति चेदन्योऽस्तु, अन्यथा घटादीनां तद्गतरूपादीनां च सम्बन्धाभावादेकत्वमेव स्यात्। तथाच घटादिद्रव्यातिरिक्तं रूपादिकं न सिध्येत्। तस्मात् रूपादिकमिव अवयविद्रव्यमभ्युपगन्तव्यम्॥ नन्ववयविद्रव्यं सर्वेष्ववयवेषु वर्तते उत प्रत्यवयवम्। नाद्यः, अवयव्यनुपलब्धिप्रसङ्गात्। समस्तावयवसन्निकर्षाभावात्। न ह्यनेकेषु वर्तमानं बहुत्वमेकमात्रग्रहणेन गृह्यते। न द्वितीयः। एकस्य एकदाऽनेकत्र वृत्त्यनुपपत्तेः। तत्तदवयवेषु विद्यमानस्यावयविनोऽनेकत्वापत्तेश्च। न च गोत्वादेरिव एकस्यानेकत्र वृत्तिर्युक्तेति वाच्यम्। गोत्वादेरपि व्यक्तिप्रत्यक्षेण ग्रहणवदवयविनोऽपि प्रत्यवयवप्रत्यक्षेण ग्रहणापातात्। न चैवं गृह्यते। गोत्वादेरपि प्रतिव्यक्तिभिन्नभिन्नत्वेन तदवयविनानात्वस्य दुर्वारत्वाच्चेति चेन्न। गोत्वादेरिव अवयविनः प्रत्यवयवं वृत्त्यभ्युपगमात्। गोत्वादिवदेवैकत्वोपगमाच्च। न च गोत्वादेरनेकत्वम्। अनुगतप्रतीतिव्यवहारयोः निरालम्बनत्वापातात्। अनुगतप्रतीतिव्यवहारालम्बनस्य गोत्वादिस्थानीयस्य सादृश्यादिधर्मस्य सर्वैरपि अभ्युपगन्तव्यत्वाच्च। तस्मादवयव्यभ्युपगमे न किञ्चिद्बाधकम्॥

ननु अवयविनोऽसत्वात् कारकव्यापारो निर्विषयः स्यात्। अभावस्य विषयत्वानुपपत्तेः। न च समवायिकारणविषयः कारकव्यापार इति वाच्यम्। अन्यविषयेण कारकव्यापारेण अन्यनिष्पत्तावतिप्रसङ्गात्। तस्मान्मृत्तन्त्वादीन्येव

कारकव्यापारविषयतया घटपटादिभावेन अवतिष्ठन्त इति नावयविद्रव्यान्तरमभ्युपगन्तव्यम् । न हि विशेषदर्शनमात्रेण वस्त्वन्यत्वं भवति, अन्यथा सङ्कुचितहस्तपादस्य प्रसारितहस्तपादस्य च देवदत्तस्य भेदप्रसङ्गात् । गच्छतः तिष्ठतः शयानस्य च भेदप्रसङ्गात् । तथा संवेष्टितस्य प्रसारितस्य च पटादेः भेदप्रसङ्गाच्चेति चेन्न । अवस्थारूपोत्पत्त्यङ्गीकारिणा त्वयापि कारकव्यापारो विद्यमानविषय इत्यङ्गीकर्तव्यत्वात् । त्वन्मते कारकव्यापारस्य अवस्थाश्रयविषयत्ववदतिरिक्तावयविवादेऽपि तस्य समवायिकारणविषयत्वोपपत्त्यातिप्रसङ्गाभावाच्च । यत्तु अन्यथा सङ्कुचितहस्तपादस्य प्रसारितहस्तपादस्य च देवदत्तस्य भेदप्रसङ्ग इत्यादि । तन्न । इष्टापत्तेः । परिमाणभेदे द्रव्यभेदावश्यंभावात् । अन्यथा देहातिरिक्ताऽऽत्मासिद्धिप्रसङ्गः स्यादित्युक्तम् । न च प्रत्यभिज्ञया तत्र देवदत्तैक्यसिद्धिः । केशनखादिष्विव तत्र तस्याः जात्यैक्यविषयत्वात् । न चैवं प्रतिक्षणं सर्वत्र किञ्चिद्विशेषसम्भवेन क्षणवादप्रसङ्गः इति वाच्यम् । सर्वत्र प्रतिक्षणं विशेषसद्भावे मानाभावात् । क्वचित् प्रतिक्षणं तादृशविशेषसद्भावेऽपि पराभिमतक्षणिकत्वानापत्त्या वैषम्याच्च । स्वोत्पत्तिक्षणवृत्तिध्वंसप्रतियोगित्वलक्षणक्षणिकत्वस्य पराभिमतत्वात् । शब्दबुद्धिकर्मदीपज्वालादिषु तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वलक्षणस्य क्षणिकत्वस्याभ्युपगमेन, अन्यत्रापि तादृशक्षणिकत्वाभ्युपगमे विरोधाभावाच्च । तस्मात्, अवयविद्रव्यान्तराभ्युपगमे न किञ्चिद्बाधकम् ।

किञ्च त्वन्मते ब्रह्मण एव वियदादिजगदुपादानत्वेन वियदादिद्रव्यस्य ब्रह्मभिन्नस्य सत्त्वेन, उपादानातिरिक्तं उपादेयद्रव्यं नास्तीत्यपार्थकं वचनम् । ननु अस्मन्मते न केवलं ब्रह्म जगदुपादानं किन्तु सूक्ष्मचिदचिद्विशिष्टं ब्रह्मैवोपादानम्, तदेव च स्थूलकार्येण रूपेण कार्यमिति उपादानोपादेययोः अनन्यत्वमिति चेत् । किमेवंवदता विशिष्टं पदार्थान्तरमित्यभिप्रेतम्, उत विशेषणविशेष्यतत्सम्बन्धरूपम् । नाद्यः, जगत्कर्तृभूतस्य ब्रह्मणः उपादानत्वानुपपादनात् । त्वया ब्रह्मणोऽभिन्ननिमित्तोपादानत्वाभ्युपगमात् । द्वितीयेऽपि चिदचिच्छब्दितजीवाव्यक्तादेः किं ब्रह्मशब्दान्तर्भावोऽभिप्रेतः, उत तद्बहिर्भावः ।

न द्वितीयः। ब्रह्मशब्दार्थस्य जगदुपादानत्वालाभात्। ब्रह्मस्वरूपस्य विकारमात्रशून्यत्वेन सन्ततैकरूपत्वात्। विकाराश्रयत्वेनैव उपादानत्वस्य वक्तव्यत्वात्। अन्यथा परिभाषामात्रत्वापत्तेः। नाद्यः। त्वन्मते तेजोऽव्यक्तकालादीनां ब्रह्मणोऽत्यन्तभिन्नत्वेन तेषां तदन्तर्भावायोगात्। त्वया ब्रह्मणो हेयप्रत्यनीकत्वाभ्युपगमेन तेषां ब्रह्मशब्दार्थबहिर्भावस्यैवयुक्तत्वाच्च। न च ब्रह्म प्रति शरीरतया प्रकारत्वेन ब्रह्मशब्दान्तर्भावो युक्तः। देवदत्ताद्यात्मनः प्रति तच्छरीराणां प्रकारतया देवदत्तादिशब्दार्थान्तर्भावस्याभ्युपगमादितिवाच्यम्। जीवाव्यक्तकालादीनां ब्रह्म प्रति मुख्यशरीरत्वाभावेन, तेषां ब्रह्मशब्दार्थान्तर्भावायोगात्। यस्यात्मा शरीरम्, यस्याव्यक्तं शरीरम् इत्यादिना जीवाव्यक्तादीनां परमात्मशरीरव्यपदेशस्य तदधीनत्वमात्रेण गौणत्वाच्च। नचान्तर्यामिब्राह्मणे सर्वेष्वपि पृथिव्यादीनां ब्रह्मशरीरतया व्यपदेशात् ब्रह्म प्रति तेषां मुख्यमेव शरीरत्वमिति वाच्यम्। तथा सति यः पृथिव्यां तिष्ठन्नित्यादिना प्रतिपर्यायं ब्रह्मणः पृथिव्याद्यवस्थितत्वप्रतिपादनेन तस्यापि मुख्यत्वप्रसङ्गात्। न च तद्युक्तम्। "स्वे महिम्नि प्रतिष्ठितः" "मायाधारो निराधारः" "न चाहं तेष्ववस्थितः" इत्यादिश्रुतिस्मृतिभिः तस्यानन्याधारत्वप्रतिपादनात्।

किञ्चान्तर्यामिब्राह्मणे यस्य वेदाः शरीरमिति त्वयाऽद्रव्यत्वेनाङ्गीकृतानां वेदादीनामपि परमात्मशरीरत्वस्य व्यपदेशदर्शनात् "जगत्सर्वं शरीरं ते" इत्यादिस्मृतौ द्रव्याद्रव्यप्रभेदभिन्नस्य जगन्मात्रस्य तच्छरीरत्वव्यपदेशदर्शनाच्च द्रव्येष्वपि तच्छरीरत्वव्यपदेशो गौण एव। न चाद्रव्याणां शरीरत्वं त्वयोच्यते।[1] न च यस्य वेदाः शरीरमित्यत्र वेदशब्दस्य वेदाभिमानिदेवतापरत्वात् तस्याश्च द्रव्यत्वात् नोक्तदोष इति वाच्यम्। तथा सति पृथिव्यादीनामपि परमात्मशरीरत्वसिद्धिप्रसङ्गात्। पृथिव्यादिशब्दानामपि तदभिमानिदेवतापरत्वस्य वक्तुं शक्यत्वात्। न च कचिद्बाधकवशादभिमानिदेवतापर्यन्तधावनेऽपि, अन्यत्र तदभावात् यथाश्रुतार्थपरत्वमिति वाच्यम्। 'यं पृथिवी न वेद' इत्यादौ

1. त्वयोपेयते इति पाठान्तरम्।

अप्रसक्तप्रतिषेधपरिहाराय तत्राप्यभिमानिदेवतापर्यन्तत्वस्य न्याय्यत्वात्। किञ्च परमात्मनः शरीरनिषेधश्रुतीनां प्राकृतशरीरविषयत्वं वदता कथं पृथिव्यादीनां मुख्यं परमात्मशरीरत्वमुच्यत इति न जानीमः। अस्तु वा जीवाव्यक्तकालादीनां परमात्मानं प्रति मुख्यशरीरत्वम्। तथापि ब्रह्मणोऽनुपादानत्वं तदवस्थम्। ब्रह्मणो निर्विकारत्वात्। विकाराश्रयत्वस्यैवोपादानत्वात्।

न च ब्रह्मणः साक्षाद्विकारानाश्रयत्वेऽपि चिदचिद्रूपशरीरगतविकाराश्रयत्वेनोपादानत्वं युक्तमिति वाच्यम्। जीवादीनामपि स्वशरीरेन्द्रियादिगतविकाराश्रयत्वेनोपादानत्वप्रसङ्गात्। देशकालयोरपि सर्वविकाराश्रयत्वेन सर्वोपादानत्वापाताच्च। न च जगदाधारताप्रयोजकसम्बन्धातिरिक्तसम्बन्धेन तदाश्रयत्वमुपादानताप्रयोजकमिति वाच्यम्। तर्हि जीवदेशकालानामिव ब्रह्मणोऽपि जगदाधारताप्रयोजकसम्बन्धेनैव सर्वविकाराश्रयत्वेनानुपादानत्वतादवस्थ्यात्। किञ्च प्रकृत्याद्याश्रयविकारेण ब्रह्मणोऽपि विकारवत्त्वे सर्वं सर्वात्मकं स्यात्, विशेषहेत्वभावात्। सर्वस्यापि यथाकथञ्चित् सर्वधर्माश्रयत्वस्योपपादयितुं शक्यत्वात्। ननु ब्रह्मणो जगदुपादानत्वस्य निर्विकारत्वस्य च प्रमाणप्रतिपन्नत्वात् स्वरूपेण निर्विकारत्वं चिदचिद्रूपशरीरद्वारा विकाराश्रयत्वेनोपादानत्वं चाङ्गीकरणीयम्, प्रमाणसिद्धार्थत्यागायोगादिति चेन्न। न तावद्ब्रह्मणः जगदुपादानत्वे प्रत्यक्षं प्रमाणम्। तत्र तस्याप्रवृत्तेः। नाप्यनुमानम्, तद्व्याप्तलिङ्गाभावात्। प्रत्युत यो यद्द्रव्यकर्ता स तद्द्रव्यनिमित्तम्, नोपादानम्, यथा कुलालादिरिति व्याप्तेरेव दर्शनाच्च। नापि श्रुतिः, साक्षाद्ब्रह्मण उपादानत्वावेदिकायाः श्रुतेरदर्शनात्। ननु यतो वा इमानि भूतानि जायन्ते, आकाशादेव समुत्पद्यन्ते, आत्मन आकाशः सम्भूतः, आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते, अक्षरात्संभवतीह विश्वम्, एतस्माज्जायते प्राणः, तस्मादेतद्ब्रह्म नामरूपमन्नं च जायते, सप्त प्राणाः प्रभवन्ति तस्मात् सप्तार्चिषः समिधः सप्त जिह्वाः, नारायणादेव समुत्पद्यन्ते इत्यादिश्रुतिषु विद्यमाना जनिकर्तुः प्रकृतिरिति सूत्रविहिता

पञ्चम्येव ब्रह्मणो जगदुपादानत्वे मानमिति चेन्न । अन्नात्प्राणा भवन्ति भूतानां प्राणैर्मनो मनसश्च विज्ञानं विज्ञानादानन्दो ब्रह्मयोनिरित्यादिश्रुतौ, पुत्रात् प्रमोदो जायत इति लोके चानुपादानेऽपि पञ्चमीश्रवणात्, प्रमाणसिद्धोपादानोपदेयभावस्थल एव जनिकर्तुः प्रकृतिरिति शास्त्रप्रवृत्तेश्च । जनिकर्तुर्या प्रकृतिः उपादानं तदपादानसंज्ञं भवतीति जनिकर्तुः प्रकृतिमनूद्य तत्रापादानसंज्ञाविधानेन तच्छास्त्रस्य प्रमाणसिद्धोपादानोपादायभावविषयत्वावसायात् । इदंप्रथमतया पञ्चम्या एव त्वया ब्रह्मण उपादानत्वे प्रमाणतया उपन्यासायोगाच्च । प्रमाणान्तरसत्त्वे च तेनैवालं किमनया । न चैवम् उदाहृतश्रुतिषु कर्तरि विहिता तृतीयैव स्यान्न पञ्चमी । तस्याः कर्तरिवा, हेतौवा, अनुशासनाभावादिति वाच्यम् । तदशिष्यं संज्ञाप्रमाणत्वात् 'नत्वा'दिति[1] सूत्रभाष्ययोः, धूमवत्त्वादिति लोके हेतावपि बहुलाविगीतप्रयोगसत्त्वेन हेतावपि पञ्चम्यस्तीत्यङ्गीकर्तव्यत्वात् । न चैवं आकाशाद्वायुः इत्यादिना आकाशे वाय्वादिकं प्रत्युपादानत्वं न सिध्येदिति वाच्यम् । पञ्चम्या तत्र उपादानत्वसिध्यनङ्गीकारात् । परब्रह्मणीव तत्र मानान्तरविरोधाभावेन तया तत्र तत्सिध्युपपत्तेश्च । नहि ब्रह्मणीव, आकाशादावपि निर्विकारत्वं प्रमाणप्रतिपन्नम्, येन तद्विरोधः स्यात् । न चैवं प्रायपाठविरोधः । निर्विकारत्वरूपानुपादानत्वलिङ्गापेक्षया सन्निधिरूपस्य तस्य दुर्बलत्वात् । ननु अस्तु तर्हि यद्भूतयोनिमित्यादिश्रुतिगतः भूतयोनिशब्दः परमात्मनः जगदुपादानत्वे प्रमाणमिति चेन्न, 'तस्य धीराः परिजानन्ति योनिम्', 'पिता पुत्रेण पितृमान् योनियोनौ' ममयोनिर्महद्ब्रह्म, 'शास्त्रयोनित्वा'दित्यादिश्रुतिस्मृतिसूत्रेषु 'सर्वस्य कलहस्य स्त्रीयोनि'रित्यादिलौकिकप्रयोगे च योनिशब्दस्यार्थान्तरेष्वपि प्रयोगदर्शनात् । पृथिवीयोनिरोषधिवनस्पतीनामित्यादावपि योनिशब्दस्य हेतुत्वमात्रपरत्वाच्च । पृथिव्या ओषधिवनस्पतीनाञ्च पृथक्सिद्धत्वात्, तेषां[2] पृथिव्युपादानकत्वेऽपि तत्र हेतुत्वपुरस्कारेणैव निमित्तमात्र-

---

1. हत्वात् इति पाठः ।
2. पृथिव्या ओषधिवनस्पत्यादिकं प्रति उपादानत्वेऽपि इति पाठान्तरम् ।

वाचियोनिशब्दप्रयोगोपपत्तेश्च । योनिशब्दस्योपादानवाचित्वेऽपि निर्विकारे ब्रह्मणि उपादानत्वायोगेन यद्भूतयोनिमित्यत्र तस्या अर्थान्तरपरत्वाश्रयणावश्यंभावाच्च । यथोर्णनाभिरित्यादिवाक्यशेषगतिश्च वक्ष्यते । एतेन 'कर्तारमीशं पुरुषं ब्रह्मयोनि'मितिश्रुतिगतो योनिशब्दोऽपि व्याख्यातः । न चात्र कर्तृत्वस्य पृथगुपादानात्, योनिशब्दस्योपादानपरत्वं वाच्यमिति युक्तम् । तत्र योनिशब्दस्य स्थानापरपर्यायाश्रयपरत्वेन त्वदभिमतार्थपरत्वायोगात् । 'योनिष्ट इन्द्रसदन' इत्यादौ स्थानेऽपि योनिशब्दप्रयोगदर्शनात्, ब्रह्मणः चतुर्मुखस्य वेदानां ब्राह्मणानां वा योनिः निमित्तमिति निमित्तार्थकत्वाश्रयणेऽपि विरोधाभावाच्च । न चासंकुचितेन कर्तृशब्देन सर्वहेतुत्वोक्तौ पुनश्चतुर्मुखादिहेतुत्वं न प्रतिपादनीयमिति वाच्यम् । गोबलीवर्दनयात्तदवैयर्थ्योपपत्तेः[1] । कर्तृत्वनिमित्तत्वयोर्भेदेन पदद्वयावैयर्थ्योपपत्तेश्च । ननु तथापि किंस्विद्वनं क उस वृक्ष आस यतो द्यावा पृथिवी निष्टतक्षुरितिद्युपृथिव्यादिकार्याधारप्रश्नं प्रति ब्रह्मवनं ब्रह्म स वृक्ष आसीत् यतो द्यावापृथिवी निष्टतक्षुः, इति प्रवृत्तं प्रतिवचनमेव ब्रह्मणोऽभिन्ननिमित्तोपादानत्वे प्रमाणम् । अत्र किंस्विद्वनमितिद्युपृथिव्यादिकार्याधारप्रश्ने क उस वृक्ष आसीदिति तदुपादानप्रश्ने च ब्रह्मवनं ब्रह्म स वृक्ष आसीदिति प्रतिवचनेन ब्रह्मण एव द्युपृथिव्यादिकार्याधारतायाः तदुपादानतायाः निमित्तत्वस्य च प्रतिपादनादिति चेन्न । 'तस्मादेतद्ब्रह्म नाम रूपमन्नं च जायते, तासां ब्रह्म महद्योनिरहं बीजप्रदः पिता, ममयोनिर्महद्ब्रह्म' इत्यादिष्विव अत्रापि ब्रह्मशब्दस्य प्रकृतिपरत्वात् । न च परब्रह्मण्येव ब्रह्मशब्दस्यपरममुख्यत्वात्तेन तद्ग्रहणमेव युक्तम्, न तु प्रकृतेः, तत्र तस्य गौणत्वादिति वाच्यम् । अत्रैव प्रश्नप्रतिवचनेषु, 'यतो द्यावापृथिवीनिष्टतक्षुः' 'यदध्यतिष्ठद्भुवनानि धारयन्', ब्रह्माध्यतिष्ठद्भुवनानि धारयन्' इत्यादिना स्रष्टुर्धारयितुरधिष्ठातुश्च परमात्मनः पृथगुपात्तत्वेन सृज्यत्वेन, अधिष्ठेयत्वेन, साध्यत्वेन चोक्तस्य ब्रह्मशब्दार्थस्य प्रकृतिरूपत्वौचित्यात् । तस्या अपि स्वकार्यमात्रं प्रति आधारतया मुख्योपादानतया च प्रश्नप्रतिवचन-

---

1. गोबलीवर्दन्यायेन इति पाठान्तरम् ।

विषयत्वोपपत्तेश्च । न च ब्रह्माध्यतिष्ठद्भुवनानि धारयन्निति त्रयाणामपि पदानां सामानाधिकरण्यमिति वाच्यम् ।

भुवनानीत्यस्य धारयन्निति क्रियाकर्मप्रतिपादकत्ववत् ब्रह्मेत्यस्याप्यध्यतिष्ठदिति क्रियाकर्मपरत्वावसायात् । अध्यतिष्ठदिति क्रियायाः सकर्मकत्वात् । न च भुवनान्येव क्रियाद्वयकर्मतयान्वयं यान्तीति वाच्यम् । तथासति भुवनानीत्यस्यावृत्तिप्रसङ्गात् । न च सा युक्ता । तां विनापि यथाश्रुतार्थपरत्वसंभवात् । तस्माद्ब्रह्मणो जगदुपादानत्वे न साक्षाच्छ्रुतिः प्रमाणम् । ननु मास्तु ब्रह्मणः साक्षादुपादानत्वावेदिका श्रुतिः । श्रौतार्थान्यथानुपपत्तिस्तु स्यात् । तथाहि "सदेव सोम्येदमग्र आसीत्" "ब्रह्म वा इदमग्र आसीत्" "आत्मा वा इदमेक एवाग्र आसीत्" इत्यादिकारणवाक्येषु इदंशब्दार्थभूतस्य प्रपञ्चस्य प्रळये सद्ब्रह्मात्मशब्दितपरमात्मरूपत्वापत्तिः प्रतिपाद्यते । प्रपञ्चस्य परमात्मरूपत्वं च न मुख्याभेदविवक्षया । ब्रह्मजगतोरत्यन्तभेदाभ्युपगमात् । नापि गौणाभेदविवक्षया; गौणार्थत्वप्रसङ्गादेव । अतः उपादानोपादेयभावविवक्षयैव जगद्ब्रह्मणोर्मुख्यं सामानाधिकरण्यम् । तथाचायमर्थः । इदमिदानीं स्थूलतया परिदृश्यमानं जगत् तत्सृष्टेः पूर्वकाले स्थूलरूपप्रहाणेन सूक्ष्मचिदचिद्विशिष्टब्रह्मात्मकमासीदिति । एवं च ब्रह्मजगदुपादानमिति सिध्यतीति ।

अत्रोच्यते । नेदमु[1]पादानोपादेयभावाभिप्रायं सदेव सोम्येदमित्यादिसामानाधिकरण्यम् । सद्ब्रह्मादिशब्दितस्य परमात्मनः निर्विकारत्वेन तदनुपादानत्वात् । साक्षाद्विकाराश्रयस्यैवोपादानत्वात् । परम्परया विकाराश्रयस्योपादानत्वेचातिप्रसङ्गात् । परिभाषामात्रत्वापत्तेश्चेत्युक्तम् । सदादि[2]शब्दिते परमात्मनि चिदचितोः प्रवेशसद्भावे मानाभावाच्च । किंच स्थूलोऽहम्,

1. न तावत् इति पाठान्तरम् ।

2. सद्ब्रह्मादिशब्दार्थे इति पाठान्तरम् ।

तत्त्वमसीत्यादाविव त्वन्मते सदेवसोम्येदमित्यादावपि शरीरशरीरिभावप्रयुक्तमेव सामानाधिकरण्यमस्तु, न तूपादानोपादेयभावनिबन्धनम् । नहि स्थूलोऽहं तत्त्वमसीत्यादौ उपादानोपादेयभावनिबन्धनं सामानाधिकारण्यमिति त्वयाङ्गीकृतम् । न चात्र सामानाधिकरण्यस्य शरीरशरीरिभावनिबन्धनत्वेऽग्रपदवैयर्थ्यम् । तस्य नित्यत्वात्[1] । अतः प्रलयकालविशेषनिबन्धनं प्रपञ्चस्य सद्ब्रह्मात्मकत्वं प्रतीयमानं सद्ब्रह्मादिशब्दितस्य प्रपञ्चोपादानत्वमवगमयति । कार्यस्योपादानकारणात्मनाऽवस्थानस्यैव लयशब्दार्थत्वादिति वाच्यम् । तथापि इदं स्थूलरूपं जगत् अग्रे सृष्टेः प्राक्काले सूक्ष्मरूपेण परमात्माधीनमेवासीत् इत्यर्थपरत्वेन त्वदभिमतार्थासिद्धितादवस्थ्यात् । तथा च स्मृतिः—यदधीना यस्य सत्ता तत्तदित्येव भण्यत इति । एवं सच्च त्यच्चाभवदित्यादिसामानाधिकरण्यवाक्यमपि व्याख्येयम् । यद्वा इदमिति ब्रह्मविशेषणम् । नचेदंशब्दस्य प्रकृतपरामर्शितयाऽप्रकृतब्रह्मपरामर्शित्वमयुक्तमिति वाच्यम् । प्रपञ्चस्याप्यप्रकृतत्वेन तत्परामर्शित्वं न युज्यत इति साम्यात् । तस्य बुद्धिस्थब्रह्मपरामर्शित्वे बाधकाभावाच्च । आत्मा वा इदमेक एवेत्यत्र अयं चासावेकश्चेत्यर्थाश्रयणेन विरोधाभावाच्च । एवं बहु स्यामिति बहुभावसंकल्पोऽपि व्याख्यातः । तस्य तत्तन्नियामकरूपविशेषविषयत्वात् । न च ब्रह्मणः नियामकरूपान्तराण्यपि सर्वदा विद्यमानानीति न संकल्पविषयत्वं तेषां युज्यते इति वाच्यम् । संकल्पस्य तदभिव्यक्तिविषयत्वोपपत्तेः । नचैकेनैव रूपेण सर्व[2]नियमनसम्भवेन तदर्थं न ब्रह्मणो रूपान्तराण्यभ्युपेयानीति वाच्यम् । एकस्सन्बहुधाविचार इत्यादिश्रुतिसिद्धत्वेन तेषामवश्याभ्युपेयत्वात् । न च नियामकरूपबहुत्वं संकल्प्य तेजःप्रभृतिसर्जनं विरुद्धमिति वाच्यम् । गुरुः स्यामिति संकल्प्य शिष्यसंपादनवत् तस्याप्यविरुद्धत्वात् । न च पूर्वत्र 'येनाश्रुतं श्रुतं भवति' इत्येकविज्ञानेन सर्वविज्ञानं प्रतिज्ञातमिति तदन्यथानुपपत्त्या ब्रह्मण उपादानत्वं सिद्ध्यतीति

---

1. तस्य सार्वकालिकत्वात् इति पाठान्तरम् ।
2. अनेकेति पाठान्तरम् ।

वाच्यम्। तस्यापि प्रधानज्ञानेन अप्रधानं ज्ञातफलं भवतीत्यर्थपरत्वात्। ब्रह्मज्ञानस्य सर्वविषयज्ञानहेतुत्वप्रतिपादनपरत्वोपपत्तेश्च। धूमादिज्ञानेन वह्न्यादिज्ञानेऽपि धूमादेः वह्न्यादेश्चानन्यत्वाभावाच्च। एवं 'यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यात्' इत्यादिदृष्टान्तोऽपि प्रधानज्ञानेनाप्रधानं ज्ञातफलं भवतीत्येवंपरः। अन्यथा मृत्पिण्डादिदृष्टान्तेन साक्षाद्विकाराश्रयतया ब्रह्मोपादानं स्यात्। दृष्टान्तेऽद्वारकमुपादानम्, दार्ष्टान्तिके तु सद्वारकमित्येतच्चासङ्गतम्। मृत्पिण्डाद्युपादाने ज्ञातेऽपि घटशरावादीनामज्ञातत्वेन अस्मद्रीत्यैव तदर्थस्य वर्णनीयत्वाच्च। एवं लोहमणिनखनिकृन्तनदृष्टान्तद्वयं च व्याख्यातम्। एतेन 'यथोर्णनाभिः सृजते गृह्णते च, यथा पृथिव्यामोषधयः सम्भवन्ति। यथा सतः पुरुषात् केशलोमानि तथाक्षरात् सम्भवतीह विश्वम्' इति श्रुतौ बहुदृष्टान्तप्रदर्शनपूर्वकं ब्रह्मण उपादानत्वं प्रतिपाद्यत इति निरस्तम्। तत्राप्यूर्णनाभिपृथिवीपुरुषाणां तन्त्वोषधिकेशलोम्नां च पृथक्सिद्धतया तच्छ्रुतेरपि हेतुत्वमात्रप्रतिपादनपरत्वात्। तन्त्वोषधिकेशलोमादिकं प्रति तत्तदवयवानामेवोपादानत्वाच्च। एतेन तदात्मानं स्वयमकुरुत इत्यादिश्रुतिरपि व्याख्याता। तदात्मानं सृजाम्यहम् इत्याद्युपबृंहणानुसारेण तच्छ्रुतेर्व्याख्येयत्वात्। 'यद्वैतत्सुकृतम्। रसो वै सः' इति कृतिविषयस्य केवलानन्दरूपत्वावेदनेन तदात्मानं स्वयमकुरुतेति पूर्ववाक्येऽपि निष्कृष्टस्वरूपमात्रपरत्वावश्यंभावाच्च।

ननु यत्प्रयन्त्यभिसंविशन्ति, आनन्दं ब्रह्मणः, सदायतनाः सत्प्रतिष्ठाः, तज्जलानिति, जीवाः प्रजायन्ते, तत्रचैवापियन्ति, आकाशं प्रत्यस्तं यन्ति, नारायणे प्रलीयन्ते, अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा, इत्यादिश्रुतिस्मृतिभिर्ब्रह्मण एव सर्वप्रपञ्चलयाश्रयत्वप्रतिपादनात्, उपादानकारणात्मना अवस्थानस्यैव लयशब्दार्थत्वात्, ब्रह्मणः प्रपञ्चोपादानत्वं दुस्त्यजमिति चेन्न। नासदासीन्नोसदासीत्तदानीं नासीद्रजो नो व्योमापरो यत्। तमआसीत्तमसा गूढमग्रे, यदा तमस्तन्नदिवा न रात्रिः, तमो वा इदमेकमास तध्देदं तर्ह्यव्याकृतमासीत्। असीदिदं तमोभूतम्, सर्वभूतानि कौन्तेय प्रकृतिं यान्ति

मामिकाम् । कल्पक्षये पुनस्तानि । रात्र्यागमे प्रलीयन्ते तत्रैवाव्यक्तसंज्ञिते ॥ इत्यादिश्रुतिस्मृतिषु तमोऽव्याकृताव्यक्तशब्दितप्रकृतेरेव साक्षात्प्रपञ्चलयाश्रयत्वप्रतिपादनेन प्रलयस्य प्राकृतत्वप्रसिद्धया च तस्या एव प्रपञ्चोपादानत्वावश्यंभावात् । ब्रह्मणः सर्वाश्रयतया कालादीनामिव सम्बन्धान्तरेण प्रपञ्चलयाश्रयत्वसम्भवेन, उदाहृतश्रुतिस्मृतीनामपि तथाविधलयाश्रयत्वप्रतिपादनपरत्वेनाविरोधाच्च । तमः परे, देव एकीभवन्ति, परेऽव्यये सर्व एकीभवन्ति, स्वँह्यपीतोभवति, वाङ्मनसि सम्पद्यते, प्रकृतिर्या मयाख्याता व्यक्ताव्यक्तस्वरूपिणी । पुरुषश्चाप्यभावे तौ लीयेते परमात्मनि, इत्यादिश्रुतिस्मृतिषु प्रतिपन्नस्य लयस्य त्वयैव गौणत्वोपपादनाच्च । मयाध्यक्षेण प्रकृतिः सूयते सचराचरम् । मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् । इत्यादिश्रुतिस्मृतिभिः प्रकृतेरेव जगदुपादानत्वप्रतिपादनाच्च । केवलप्रकृतेरेवोपादानत्वसम्भवे निर्विकारे ब्रह्मणि तच्छरीरकत्वं परिकल्प्य तत्र पारिभाषिकस्य जगदुपादानत्वस्याकल्पनीयत्वाच्च ।

किञ्च चिदचिच्छरीरकं ब्रह्म जगदुपादानमित्ययुक्तम् । अचितोरव्यक्तकालयोः साक्षादवस्थायोगित्वेऽपि चिच्छब्दितानां जीवानां ब्रह्मस्वरूपवन्निर्विकारत्वेन तेषामुपादानकोटिप्रवेशाङ्गीकारायोगात् । न च धर्मभूतज्ञानगतावस्थामादाय तेषामप्यवस्थायोगित्वेन तत्प्रवेशो युक्त एवेति वाच्यम् । परम्परया अवस्थाश्रयत्वमादाय उपादानत्वाङ्गीकारे अतिप्रसङ्गात् । एवंविधोपादानत्वांगीकारस्य परिभाषामात्रत्वेनाप्रयोजकत्वाच्च ।

किञ्च त्वन्मते धर्मभूतज्ञानस्य नित्यत्वेनावस्थाश्रयत्वायोगः । न च स्वरूपेण नित्यस्यापि धर्मभूतज्ञानस्यावस्थान्तरयोगित्वमुपपद्यत इति वाच्यम् । एवंविधकल्पनायां प्रमाणाभावात् । घटज्ञानमुत्पन्नं नष्टञ्चेत्यनुभवेन ज्ञाननित्यत्वाङ्गीकारायोगाच्च ॥ ननु 'नहि द्रष्टुः दृष्टेः विपरिलोपो विद्यते'। 'अविनाशित्वात्'। 'तथा हेयगुणध्वंसादवबोधादयो गुणाः । प्रकाश्यन्ते न जन्यन्ते नित्या एवात्मनो हि ते'। इत्यादिश्रुतिस्मृतिभिर्ज्ञानस्वरूप-

नित्यत्वप्रतिपादनादुत्पत्तिविनाशावनुभवावस्थामादायोपपादनीयाविति चेन्न । तच्छ्रुत्या ईश्वरज्ञानस्याबाधितार्थविषयत्वप्रतिपादनेन त्वदभिमतार्थस्याप्रतिपादनात् । सर्वद्रष्टुरीश्वरस्य दृष्टेः साक्षात्कारस्य विपरिलोपो बाधो न विद्यते' अविनाशित्वात् नित्यत्वादिति तदर्थविज्ञानात् , विपरिलोपशब्दस्य नाशार्थत्वे हेतुसाध्ययोः अविशेषप्रसङ्गात् । तथा हेयगुणध्वंसादित्युदाहृतस्मृतेश्च साक्षिज्ञानादिनित्यत्वप्रतिपादनपरत्वेन तदतिरिक्तधर्मभूतज्ञाननित्यत्वप्रतिपादनपरत्वायोगाच्च । ज्ञानस्वरूपजीवातिरिक्तस्य घटपटादिविषयकानित्यज्ञानातिरिक्तस्य नित्यस्य धर्मभूतज्ञानस्यानङ्गीकारे बाधकाभावाच्च । न च मोक्षे जीवस्य जन्यज्ञानाभावात् तदानीमपि तस्य ज्ञातृत्वात् ज्ञप्तिमात्रस्वरूपत्वाभावाच्च नित्यज्ञानमादायैव तस्य ज्ञातृत्वमुपपादनीयम् इति वाच्यम् । सुप्ताविव स्वप्रकाशस्वरूपज्ञानमादायैव तस्य तदानीं ज्ञातृत्वोपपत्तेः । न हि त्वन्मतेऽपि सुप्तौ धर्मभूतज्ञानोपयोगोऽस्ति । तदा तस्य निर्विषयत्वोपगमात् । अस्वप्रकाशत्वोपगमाच्च । न च मुक्तस्य सर्वज्ञत्वात् स्वरूपज्ञानस्य स्वमात्रविषयत्वात् अन्याविषयत्वाच्च तस्य सर्वविषयं नित्यं ज्ञानान्तरं अङ्गीकरणीयमिति वाच्यम् । स्वरूपज्ञानस्य स्वविषयत्वेऽपि अन्यविषयत्वे बाधकाभावात् । अन्यथा धर्मभूतज्ञानस्यापि स्वविषयत्वेन अन्याविषयत्वप्रसङ्गात् । न चान्यप्रकाशत्वेनैव तस्य सिद्धिरिति वाच्यम् । स्वरूपज्ञानस्यापि तथात्वात् । तस्य स्वप्रकाशत्वोपगमाच्च । न च स्वरूपज्ञानस्य संसारदशायां सर्वाविषयस्य कथं मुक्तौ सर्वविषयकतेति वाच्यम् । तर्हि धर्मभूतज्ञानस्यापि मुक्तौ सर्वविषयत्वाभावप्रसङ्गात् । संसारदशायां तस्यापि सर्वविषयत्वाभावात् । तस्मात् स्वरूपज्ञानेनैव मुक्तौ ज्ञातृत्वसर्वज्ञत्वादिकं सुवचमिति न तदर्थं जीवस्य धर्मभूतज्ञानं अङ्गीकरणीयम् , किंतु संसारदशायां घटपटादिवृत्तिरूपं जन्यं ज्ञानमङ्गीकरणीयमिति ।

ननु वृत्तिरूपज्ञानस्य किमुपादानम् , न तावदात्मा । अनभ्युपगमात् । अणुपरिमाणे जीवात्मनि तदधिकपरिमाणवृत्तिज्ञानोत्पत्त्ययोगाच्च । न च प्रदीपादेः प्रभाद्युपादानत्ववत् जीवस्यापि स्वाधिकपरिमाणज्ञानोपादानत्वं युक्तमिति

वाच्यम् । प्रभायाः प्रदीपानुपादेयत्वेन तद्दृष्टान्तायोगात् । न च वृत्तिरूप ज्ञानस्य जीवादधिकपरिमाणाभावेन तदुपादानत्वं युक्तमिति वाच्यम् । सर्वाङ्गीणसुखाद्यनुसंधानबलेन तस्याधिकपरिमाणावश्यंभावात् । न च सर्वाङ्गीण-सुखाद्यनुसंधानं साक्षिरूपम् । आगमापायिनस्तस्य साक्षिरूपत्वायोगात् । ह्रीः धीः भीः इत्येतत्सर्वं मन एव इति सावधारणश्रुतिविरोधाच्च । ज्ञानद्वारैवात्मनः सर्वशरीरसंबन्धस्य वक्तव्यत्वाच्च । नापि मनः । जडस्य ज्ञानानुपादानत्वात् । जडोपादेयतया ज्ञानस्य जडत्वप्रसङ्गात् । आत्मधर्मत्वाभावप्रसङ्गाच्च । अत एव न शरीरं, बाह्यमतप्रवेशप्रसङ्गाच्च इति चेत् । उच्यते ॥ मन एव वृत्ति-ज्ञानाद्युपादानम् । न चोक्तदोषः । वाय्वादेरग्न्याद्युपादानभावोपगमात् । उपादानोपादेययोः समस्वभावत्वस्य शतशो व्यभिचारात् । दण्डादेः देवदत्तादि-धर्मत्वोपलम्भाच्च । न च कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृति-र्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव इति श्रुतिः लाङ्गलं जीवनमितिवत् उपचरितार्थ-परेति युक्तम् । मृद्धटइत्यादिवदुपादानोपादेयभावप्रतिपादकत्वे बाधका-भावात् ।

"महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव च ।
इन्द्रियाणि दशैकं च पञ्च चेन्द्रियगोचराः ॥
इच्छा द्वेषः सुखं दुखं संङ्घातश्चेतना धृतिः ।
एतत् क्षेत्रं समासेन सविकारमुदाहृतम् ॥"

इति गीतायां ज्ञानेच्छाद्वेषसुखदुःखादीनां क्षेत्रविकारत्वोपादानं उदाहृतश्रुत्यनु-सारेण इन्द्रियाणि दशैकं च इत्येकशब्दोक्तमनोविकारत्वमादायैव पर्यवस्यतीति न किञ्चिदनुपपन्नम् । अद्वैतिमते च ब्रह्मणोऽनुपादानत्वमन्यत्र प्रपञ्चितमिति नेह प्रस्तूयते । तस्मात् जगत्प्रति कर्तृभूतस्य ब्रह्मणोऽनुपादानत्वात् प्रकृतेरेव च तथात्वात् तस्या वियदादेश्चाभेदवत् भेदस्याप्यावश्यकत्वात् उपादानोपादेययोः केवलमभेद इति वादोऽनुपपन्न इति स्थितम् ।

किञ्च भक्तिः प्रपत्तिश्चेति मोक्षसाधनं द्विविधमित्यनुपपन्नम् । प्रपत्तेः मोक्षसाधनत्वे प्रमाणाभावात् । तथाहि न तावत् "मुमुक्षुर्वै शरणमहंप्रपद्ये" इति श्रुतिः तत्र प्रमाणम् । ब्रह्मविदाप्नोति परम्, तरति शोकमात्मवित्, तमेवं विद्वानमृतइहभवति इत्यादाविव प्रपद्ये इत्यस्यापि भक्तिरूपज्ञानपरत्वात् । वेदान्तेषु प्रतिपन्नस्य मोक्षसाधनीभूतब्रह्मज्ञानस्य धातुभेदश्रवणेऽपि छागपशुन्यायेन त्वया भक्तिरूपत्वाभ्युपगमेन "प्रपद्य" इत्यस्यापि भक्तिरूपस्यैव अङ्गीकर्तव्यत्वात् । अन्यथान्यत्रापि भक्तिविश्रान्त्यभावप्रसङ्गेन भक्तिवत्प्रपत्तिवच्चोपायान्तरमपि सिध्येत् । न हि ब्रह्मविदाप्नोतीत्यादावेव भक्तिरूपज्ञानविशेषपर्यवसानम् । न तु "प्रपद्ये" इत्यत्रेतिविशेषनियामकमस्ति । न च "प्रपद्य" इत्यस्य साक्षात् ज्ञानविशेषवाचित्वेन प्रपत्तिरूपोपायान्तरसिद्धिरिति युक्तम् । तथा सति मत्वा धीरो न शोचतीत्यादौ मत्वेत्यादीनां मननादिरूपज्ञानविशेषवाचित्वेन मननरूपोपायान्तराभ्युपगमप्रसङ्गात् । तत्र भक्तौ पर्यवसानं चेत् अत्रापि तथास्तु । न च ब्रह्मविदाप्नोतिपरम् इत्यादौ श्रूयमाणानां विद्यादिधातूनां साक्षादेव भक्तिवाचित्वमिति वाच्यम् । प्रमाणाभावात् । "प्रपद्य" इत्यस्यापि साक्षादेव भक्तिवाचित्वमित्यपि वक्तुं शक्यत्वात् । छागपशुन्यायेन भक्ति-विश्रान्त्यभ्युपगमायोगाच्च । न हि वेदनादिशब्दस्य साक्षादेव भक्तिवाचित्वे छागपशुन्यायावतारः सम्भवति । सामान्यशब्दस्य विशेषे पर्यवसान एव तन्न्यायावतारात् । तस्य "प्रपद्य" इत्यत्रापि वक्तुं शक्यत्वेन कथं प्रपत्ति-रूपोपायान्तरसिद्धिरिति न जानीमः । अस्तु वा प्रपद्ये इत्यस्य प्रपत्तिरूपज्ञान-विशेषवाचित्वं, तथापि न तस्य साक्षान्मोक्षसाधनत्वम् । त्वन्मते कर्मयोग-ज्ञानयोगयोरिव प्रपत्तेरपि भक्त्यङ्गत्वोपपत्तेः । अङ्गेऽप्यङ्गिफलानुवादोपपत्तेश्च । अत एव रामानुजाचार्यैः 'सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज' इत्यादि चरमश्लोकः स्वतन्त्रप्रपत्तिपरत्वेन व्याख्यायानन्तरमस्वारस्यादङ्गप्रपत्तिपरत्वेन व्याख्यातः । इत्थं हि चरमश्लोकोऽवतारितः । "अथवा सर्वपापविनिर्मुक्ता-त्यर्थभगवत्प्रियपुरुषनिर्वर्त्यत्वाद्भक्तियोगस्य तदारम्भविरोधिपापानामानन्त्यात्तत्प्राय-

श्चित्तरूपैर्धर्मैरपरिमितकालकृतैः तेषां दुस्तरतयाऽऽत्मनो भक्तियोगारम्भानर्हतामालोच्य शोचतोऽर्जुनस्य शोकमपनुदन् श्रीभगवानुवाच ॥ सर्वधर्मानित्यादि (रा. गी. भा. अ. १८, श्लो. ६६) तथा दैवी ह्येषा गुणमयी मम माया दुरत्यया । मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥ इति श्लोकव्याख्यानावसरे मामेव सत्यसंकल्पं परमकारुणिकम्, अनालोचितविशेषाशेषलोकशरण्यं ये शरणं प्रपद्यन्ते, ते एतां मदीयां गुणमयीं मायां तरन्ति । मायामुत्सृज्य मामेवोपासते इति (रा. गी. भा. अ. ७, श्लो. १४) प्रपत्तेर्भक्त्यङ्गत्वमेवोक्तम् । तथा किमिति भगवदुपासनापादिनीं प्रपत्तिं सर्वे न कुर्वते इत्यत्राह न मां दुष्कृतिनो मूढाः प्रपद्यन्ते नराधमाः । माययापहृतज्ञाना आसुरं भावमाश्रिताः ॥ इति श्लोकावतारिकायामपि प्रपत्तेर्भक्त्यङ्गत्वमेवोक्तम् । तस्मात् प्रपत्तेर्नस्वातन्त्र्येण मोक्षसाधनत्वम् ।

किञ्च कर्माङ्गिका यावज्जीवमनुष्ठेया च भक्तिः, प्रपत्तिस्तु कर्माद्यनपेक्षा सकृदेवानुष्ठेया इति कथमनयोर्विकल्पेन मोक्षसाधनत्वम् । गुरुलघुविकल्पायोगात् । लघूपाये सति गुरूपाये प्रवृत्त्यभावात् । 'अर्के[1] चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत्' इति न्यायेन लघुनैव फलसिद्धेः । न चाग्निहोत्रदर्शपूर्णमासज्योतिष्टोमादीनां गुरुलघुभूतानां स्वर्गार्थिप्रवृत्तिविषयत्वं दृश्यत इति वाच्यम् । तत्र फलेष्वपि तारतम्यसत्त्वेन तत्तत्फलविशेषार्थिप्रवृत्तिविषयत्वसम्भवात् । त्वया मोक्षे तारतम्यानभ्युपगमेन तदर्थिनां भक्तिरूपगुरूपायप्रहाणेन प्रपत्तिरूपलघूपाय एव प्रवृत्तेरवश्यंभावेन वैषम्यात् । न चात्रव्यवस्थितविकल्पः । तद्व्यवस्थापकप्रमाणादर्शनात् । न च शक्तस्य भक्तावधिकारः, अशक्तस्य तु प्रपत्ताविति व्यवस्था कल्प्यत इति वाच्यम् । शक्तेः सामर्थ्यरूपतया सामर्थ्यस्य च अर्थी समर्थो विद्वान् शास्त्रेणापर्युदस्त इति सामान्यतोऽधिकारप्रविष्टतया प्रपत्तावप्यवश्यंभावेन अशक्तस्य प्रपत्तावधिकार इत्यस्यायोगात् । न च भक्तिप्रपत्त्योः सामर्थ्यं नैकरूपमिति वाच्यम् ।

---

1. अत्के चेत्, अक्के चेत् इति च पाठान्तरम् ।

अनुष्ठानौपयिकस्य लौकिकसामर्थ्यस्य सर्वत्रैकरूपत्वात् । अन्यथा भक्तौ या शक्तिः सा प्रपत्तौ नास्ति, प्रपत्तौ च या शक्तिः सा भक्तौ नास्तीति शक्ताशक्ताधिकारे भक्तिप्रपत्ती इति रिक्तं वचनम् । न च भक्तावनधिकारी प्रपत्तावधिकारीति युक्तम् । भक्तावपि शूद्राणामनधिकारितया शूद्राणामेव प्रपत्तावधिकार इत्यापातात् । न च तद्युक्तम् । प्रपत्तौ त्रैवर्णिकाधिकारिकत्वस्यापि त्वयाङ्गीकृतत्वात् । त्रैवर्णिकानां च भक्तावधिकारस्य पुष्कलत्वात् ।

ननु

भक्त्यादौ शक्त्यभावः प्रमितिरहितता शास्त्रतः पर्युदासः
कालक्षेपाक्षमत्वं त्विति नियतिवशादापतद्भिश्चतुर्भिः ।
एकद्वित्र्यादियोगव्यतिभिदुरनिजाधिक्रियाःसंश्रयन्ते
सन्तः श्रीशं स्वतन्त्रप्रपदनविधिना मुक्तये निर्विशङ्काः ॥

इति श्लोकोक्तप्रकारेण भक्तौ शक्तिः, ज्ञानं, शास्त्रापर्युदस्तत्वं, कालक्षेपक्षमत्वं चेति चतुर्णां मिलितानामधिकारिकोटिप्रवेशः । प्रपत्तौ तु चतुर्णामभावोऽधिकारः । स चैकैकनिवृत्त्या चतुर्धा, द्विकद्विकनिवृत्त्या षोढा, त्रिकत्रिकनिवृत्त्या चतुर्धा, कृत्स्ननिवृत्त्या चैकश्चेति पंचदशविधः । शक्त्यादिमेलननिषेधस्य सर्वत्राप्यविशिष्टत्वात् । तथाचैकैकसद्भावे द्विकद्विकसद्भावे त्रिकत्रिकसद्भावे चतुर्णामपि सद्भावे प्रपत्त्यधिकारो भवति । एवं च भक्तिरूपदुष्करोपायानधिकारिणो मुमुक्षोः प्रपत्तिरूपसुकरोपायः 'शरणमहं प्रपद्ये' इत्यादौ प्रतिपाद्यत इति ॥

मैवम् । प्रपत्तिरूपसुकरोपाये सति दुष्करोपायभूतायां भक्तौ प्रवृत्त्यभावस्योक्तत्वात् । प्रपत्तौ शक्त्यादीनामप्यवश्यंभावस्योक्तत्वाच्च । न च भक्तावष्टांगोपेतयोगस्यांगतया, तस्यास्मदादिभिरनुष्ठातुमशक्यतया तदनुष्ठानशक्तानां ऋष्यादीनामेव तत्राधिकारः, न प्रपत्तौ, अस्मदादीनां तु प्रपत्तावेवाधिकारः न भक्ताविति वाच्यम् । तथा सति येषां महाविश्वासो नास्ति तेषां न प्रपत्तावप्यधिकार इति तान् प्रत्युपायान्तरस्यापि स्वीकारापातात् ।

तथाविधमुपायान्तरं नास्तीति चेत्तर्हि भक्त्यनधिकृताधिकारिकं प्रपत्तिरूपोपायान्तरमपि नांगीकार्यं स्यात् । 'शरणमहं प्रपद्य' इति प्रपत्तिः श्रूयत इति चेत् सत्यम् । तावता तस्याः साक्षान्मोक्षसाधनत्वायोगात् । तत्र तच्छ्रुतेः अङ्गप्रपत्तिविषयत्वेनाप्युपपत्तेरित्युक्तम् । तस्मात् "मुमुक्षुर्वै शरणमहं प्रपद्ये" इति श्रुतिः न प्रपत्तेः स्वतन्त्रोपायत्वे[1] प्रमाणम् ॥ एतेन ब्रह्मणे त्वा महस ओमित्यात्मानं युञ्जीत । इति श्रुतौ प्रपत्तिरूपमुपायान्तरं विधीयत इति निरस्तम् । सत्यतपोदमदानधर्मप्रजननाग्निहोत्रयज्ञमानसाख्यानां भक्त्यङ्गभूतानां कर्मणां पूर्वं प्रतिपादितत्वेन 'ओमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीते'त्यादिश्रुत्यन्तरानुसारेण च कर्माङ्गभक्तेरेव अत्र प्रतिपादनीयत्वात् । प्रणवानुसन्धानपूर्विकायाः न्यासविद्यायाः स्त्रीशूद्रादिसर्ववर्णसाधारणप्रपत्तिरूपत्वायोगाच्च । 'ज्ञात्वा तमेवं मनसा हृदा च भूयो न मृत्युमुपयाति विद्वानि'ति पूर्ववाक्ये भक्तिरूपं ज्ञानं प्रतिपन्नमिति चेत् । किं तावता, फलसाधनतया उक्तस्य तस्यैव समन्त्रकस्यात्र विधानमित्यस्तु ॥

ननु 'न्यास इति ब्रह्म ब्रह्म हि परः परो हि ब्रह्म तानि वा एतान्यवराणि च परांसि न्यास एवात्यरेचयदिति' पूर्वानुवाके तस्मान्न्यासमेषां तपसामतिरिक्तमाहुरित्यत्र च सत्यतपःप्रभृतिकर्मणात्मानं युञ्जीतेति विहितन्यासस्य चात्यन्तवैलक्षण्यप्रतिपादनान्न्यासविद्या कथं कर्माङ्गभक्तिरूपेति चेत् । कात्र कथंता । तच्छ्रुतेस्तेषां स्वतन्त्रफलसाधनत्वावस्थामादाय भक्तिरूपज्ञानवैलक्षण्यप्रतिपादनपरत्वेन विरोधाभावात् । न चात्मानं युञ्जीतेत्यत्रात्मसमर्पणमात्रप्रतिपादनेन भक्तिवैलक्षण्यात् प्रपत्तिरूपोपायान्तरमेव विधीयत इत्यङ्गीक्रियत इति वाच्यम् । एवंविधवाक्यानां[2] भक्तिविलक्षणोपायविधायकत्वाभावात् । अन्यथा 'धनुर्गृहीत्वौपनिषदं महास्त्रं शरं ह्युपासानिशितं सन्दधीत । आयम्य तद्भावगतेन चेतसा लक्ष्यं तदेवाक्षरं सोम्य विद्धि । प्रणवो धनुश्शरोह्यात्मा

1. उपायान्तरत्वे इति पाठान्तरम् ।

2. एवंविधवैलक्षण्यस्याप्रयोजकत्वादिति पा० ।

ब्रह्म तल्लक्ष्यमुच्यते । अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत्' इत्यादि-श्रुतिष्वपि वैलक्षण्यसत्त्वेन भक्तिरूपोपायप्रहाणेन तासामप्युपायान्तरविधिपरत्वापातात् । ननु तासां प्रपत्तिरूपोपायान्तरपरत्वोपपादनमिष्टम्

[1] लक्ष्ये यत्र श्रुतिमितगुणाकृष्टिलब्धावधानैः
प्रत्यग्बाणः प्रणवधनुषा सत्त्ववद्भिः प्रयुक्तः ॥
मध्येवक्षः स्फुरति महसा पत्रलः कौस्तुभात्मा
पद्माकान्तः प्रभवतु दयादुग्धसिन्धुः श्रियै नः ॥

इत्युदाहृतश्रुतिसमानार्थस्य श्लोकस्याभियुक्तैः प्रपत्तिपरत्वेन प्रवृत्तिरित्यभिधानादितिचेत् ।

सत्यं । तदेव न संभवतीति ब्रूमः । तदेतत्सत्यं तदमृतं तद्वेद्धव्यं सोम्य विद्धि । धनुर्गृहीत्वौपनिषदं इत्यादीनां अङ्गिरसा शौनकं प्रत्युपदिष्टतया त्वदुक्तप्रकारेण शौनकस्य महर्षेः भक्तावेवाधिकारितया तं प्रति प्रपत्तेरनुपदेष्टव्यत्वात् । अन्यथाऽनाकांक्षाभिधानं स्यात् ।

किञ्च स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठां प्रोवाच तां तत्त्वतो ब्रह्मविद्याम् । इत्युपक्रमे अक्षरब्रह्मप्राप्तिसाधनभूतस्य भक्तिरूपज्ञानस्यैव प्रक्रान्तत्वात्, उत्तरत्रापि तदेव प्रतिपादनीयम् । न च तत्र विद्याशब्दः उपनिषत्परः । ज्ञानस्यैव तन्मुख्यार्थत्वात् । द्वे विद्ये वेदितव्ये इत्यत्र विद्याशब्दस्य त्वया परोक्षापरोक्षरूपब्रह्मज्ञानपरतया व्याख्यातत्वेन अत्र तत्परत्वस्यैव युक्तत्वाच्च । किञ्च अदृश्यत्वाधिकरणे तदेतत्सत्यं तदमृतम् तद्वेद्धव्यं सोम्य विद्धीत्यारभ्य प्रणवो धनुः शरो ह्यात्मा इत्यादिभिः उपासनाप्रकार उक्त इत्यर्थ इति भाष्यव्याख्यानभूतश्रुतप्रकाशिकावाक्येन तच्छ्रुतेः भक्तिपरत्वमेव स्पष्टमिति न प्रपत्तिपरत्वशङ्कावकाशः । किञ्च 'तस्यैवं विदुष' इत्युत्तरानुवाके प्रतिपाद्यमाना पुरुषविद्या प्रकृतब्रह्मविद्याङ्गभूतेति त्वन्मतम् । एवं च न्यासविद्या कथं

1. वेदान्तदेशिकप्रणीतसंकल्पसूर्योदयनाटके प्रथमाङ्के द्वितीयश्लोकः पुट १, काञ्चीमुद्रितम् १९४२ ।

प्रपत्तिरूपा । प्रपत्तेरानुकूल्यसङ्कल्पाद्यतिरिक्ताङ्गानपेक्षत्वस्य त्वदभिमतत्वात् । न च तस्यैवं विदुषः इत्यादिना प्रतिपन्ना पुरुषविद्या प्रकृतब्रह्मविद्याङ्गमेव नेति युक्तम् । किं तैत्तिरीयकपुरुषविद्या प्रकृतब्रह्मविद्याङ्गं उत नेति किं तस्यैवं विदुष इति निर्देशो ब्रह्मविद्याङ्गत्वं गमयति नेति तदर्थचिन्तां[1] प्रदर्शयता श्रुतप्रकाशिकाचार्येण सिद्धान्ते तस्याः प्रकृतब्रह्मविद्याङ्गत्वस्यैवोपगमात् । न हि पुरुषविद्यायाः प्रकृतब्रह्मविद्याङ्गत्वाभावे गुणोपसंहारपादे तद्भेदाभेदचिन्तोपपद्यते । स्यादेतत् । न्यासनिष्ठमेव तस्यैवं विदुष इति परामृश्य तत्कर्तव्यत्वेन पुरुषविद्याम्नाता । सा च 'यन्मरणं तदवभृथ' इत्यन्ता यज्ञदृष्टिरूपा च । अतो यावज्जीवं तदर्थं कर्तव्यस्य विधीयमानत्वात् न प्रयस्येत्तदर्थमित्यनुपपन्नम् । मैवम् । तत्रापि हि न्यस्त[2] भारस्य कर्तव्यान्तरनैरपेक्ष्यमेव विवक्षितम् । यदि तु प्रस्तुतविद्याङ्गतयात्र यज्ञकृतिर्विधीयते तर्हि दर्शपूर्णमासादीनां कृतिः न वाच्या तेषां यज्ञोपयोगित्वाभावात् । अश्रुतपूर्वतदन्वितयज्ञान्तरपरिकल्पनं अनेकशास्त्रार्थदृष्टिविधिकल्पनं च अत्यन्तगौरवोपहतम् । एकस्यावभृथात्पूर्वं अन्येषां कृतिश्चानुपपन्ना । तस्मात् "एवं शरणमभ्येत्य भगवन्तं सुदर्शनम् । अनुष्ठितक्रतुशतो भवत्येव न संशयः ॥" इत्यादिवद्यज्ञादिकं सर्वमस्य स्वतः सम्पन्नं भवतीति स्तुतिमात्रे तात्पर्यं ग्राह्यम् । शारीरकभाष्यमप्येतदनुगुणतया[3] नेयं, न्यासविंशतिव्याख्याने वेदान्तचार्यैः शङ्कासमाधानयोः कृतत्वेन ओमित्यात्मानं युञ्जीतेत्यत्र प्रपत्तिरूपोपायान्तरविधाने न कश्चिद्विरोध इति । मैवम् । 'तस्यैवं विदुष' इत्याद्यनुवाकस्याविरोधेन प्रकृतब्रह्मविद्याङ्गपरत्वे सम्भवति स्तुतिपरत्वाङ्गीकारायोगात् । अन्यथा पुरुषविद्याभेदाभेदचिन्तनस्य गुणोपसंहारपादे असङ्गतत्वापातात् । न हि तैत्तिरीये श्रुतपुरुषविद्याया अभावे

---

1. चिन्तापरम्पराम् इति पाठान्तरम् ।
2. न्यासविंशतिः सप्तदशः श्लोकः १७
3. एतदविरोधेनेति पा.

तत्र तच्चिन्ता उपपद्यते, 'पुरुषविद्यायामपि चेतरेषामनाम्नानात्' इति सूत्रं चासंगतं स्यात्। अत एव

यद्येवं यज्ञदृष्टिः परविदि पुरुषे चोद्यते सानुबन्धे
यज्ञस्यानङ्गभूतं कथमिह विविधं कल्प्यते तत्र तत्र॥
तस्मात्प्रक्रान्तविद्यास्तुतिरियमुचितेत्याहुरेकेऽन्यथान्ये
तिष्ठत्वेतद्विधापि प्रकृतसुघटिता सम्प्रदायस्तु चिन्त्यः[1]॥" इति

अधिकरणसारावल्यां शङ्कासमाधानत्वेनार्थवादत्वपक्षमुपन्यस्यानेकशास्त्रार्थदृष्टिविधिपरतया पक्षान्तरमुपन्यस्तम्। युक्तं च तथा गौरवस्य प्रामाणिकत्वात्। तस्मादोमित्यात्मानं युञ्जीतेत्यत्र न प्रपत्तिविधानमिति स्थितम्। अस्तु वा तत्र प्रपत्तिविधानम्। तच्चाङ्गप्रपत्तिविषयमिति न कश्चिद्दोषः। न चैवमत्रानुवाके अङ्गिभूतपरब्रह्मविद्यायाः अलाभः। ज्ञात्वा तमेवं मनसा हृदा चेति पूर्ववाक्येन तल्लाभात्। तस्यैवं विदुष इत्यादिना तदनुवादेन पुरुषविद्यारूपाङ्गविधानोपपत्तेश्चेति यत्किञ्चिदेतत्। एतेन "वेदान्तविज्ञानसुनिश्चितार्थाः सन्न्यासयोगाद्यतयः शुद्धसत्वाः। ते ब्रह्मलोके तु परान्तकाले परामृतात् परिमुच्यन्ति सर्वे।" इत्यादिश्रुतिरपि व्याख्याता। तत्र सन्न्यासशब्दस्य प्रपत्त्यर्थकत्वे प्रमाणाभावात्। "काम्यानां कर्मणां न्यासं सन्न्यासं कवयो विदुः" इति स्मृत्यनुसारेण [2]तस्यार्थवर्णनौचित्यात्। एवं श्रीमन्नारायणचरणौ शरणं प्रपद्ये इत्यादिरूपे त्वदङ्गीकृतशरणागतिमन्त्रेऽपि अङ्गभूतप्रपत्तिरेवोच्यते। न तु स्वतन्त्रप्रपत्तिः। किञ्च शरणागतिमन्त्रद्वयाभिधोऽयं मन्त्रः त्वन्मतमात्रसिद्ध इति तेन कथं प्रपत्तिरूपोपायान्तरसिद्धिः। न च कठवल्लीषु "आम्नातं कठवल्लीषु प्रपत्तेर्वाचकं द्वयम्।" इत्यभियुक्तोक्तेरिति वाच्यम्। प्रसिद्धकठवल्लीष्वदर्शनात्। कठवल्ल्यन्तरसद्भावे मानाभावात्। विप्रतिपन्नं प्रति त्वदीयाचार्यवचनस्य प्रामाण्याभावात्। अस्तु वा कठवल्ल्यन्तरमथापि न तवेष्टसिद्धिः।

1. अधिकरणसारावलिग्रन्थे ३ अध्याये, ३ पादे, ७ अधिकरणे
2. श्रुतिगतसन्न्यासशब्दार्थस्यानुसरणीयत्वाच्च इति पाठः।

तथाविधमन्त्रस्याङ्गप्रपत्तिपरत्वेनाप्युपपत्तेरित्यसकृदवोचाम ॥ न चास्मन्मते प्रपत्तेर्भक्त्यङ्गत्वमेव नेति शक्यं वक्तुम् । प्रपत्तेर्भक्त्यङ्गत्वज्ञापकस्य त्वदीयगीताभाष्यवचनस्य दर्शितत्वात् । उपायभक्तिः प्रारब्धव्यतिरिक्ताघनाशिनी । साध्यभक्तिस्तु सा हन्त्री प्रारब्धस्यापि भूयसी ॥ इति वदता त्वया साध्या भक्तिः यया सा साध्यभक्तिः प्रपत्तिरित्यर्थ इति तदर्थस्वीकारेण प्रपत्तेः भक्तयङ्गत्वस्यापि स्वीकाराच्च । 'प्रपन्नादन्येषां न दिशति मुकुन्दो निजपदम्' । इति संग्रहश्लोकोक्तेरपि स्वतन्त्राङ्गप्रपत्तिमद्विषयतया व्याख्येयत्वात् । अन्यथा भक्तेः प्रपत्तिनैरपेक्ष्येण मोक्षसाधनत्वे मुकुन्दः प्रपन्नादन्येषां मोक्षं न ददातीति निषेधोऽसंगतः स्यात् । तस्यास्तदङ्गत्वे तु तथोक्तिः संगतेति प्रपत्तेर्भक्त्यङ्गत्वमेवोचितम् । नतु स्वातन्त्र्येण मोक्षसाधनत्वम् । किञ्च प्रपत्तेः स्वातन्त्र्येण मोक्षसाधनत्वे 'तमेवं विद्वानमृत इह भवति' इत्यादिनिषेधोऽसङ्गतः स्यात् । तत्र भक्तयतिरिक्तस्य मोक्षसाधनत्वनिषेधात् । तत्रत्यवेदनशब्दस्य त्वया छागपशुन्यायेन भक्तिरूपज्ञानविशेषे विश्रान्तिरित्यभ्युपगमात् । न च तत्रत्यविदिधातोः प्रपत्तिरूपज्ञानविशेषेऽपि विश्रान्तिरङ्गीक्रियत इति वाच्यम् । तथाङ्गीकारस्य प्रपत्तेः स्वतन्त्रोपायान्तरत्वसिद्ध्यधीनत्वेनान्योन्याश्रयात् । न चे तत्रत्यविदिधातोः ज्ञानमात्रमर्थः । एवं च प्रपत्तिश्च ज्ञानमिति न निषेधानुपपत्तिः इति वाच्यम् । तथासति मननरूपज्ञानविशेषस्यापि मोक्षसाधनत्वापातात् । मत्वा धीरो न शोचतीत्यादिश्रुतिदर्शनादित्युक्तम् । न च वाक्यान्तरे प्रपत्तेः साक्षान्मोक्षसाधनत्वावगमान्नान्यः पन्था इति निषेधः तद्व्यतिरिक्तविषय इति युक्तम् । तथाविधवाक्यान्तरस्यादर्शनात् । 'मुमुक्षुर्वै शरणमहंप्रपद्ये, ओमित्यात्मानं युञ्जीत' इत्यादिवाक्यार्थस्याद्याप्यनिष्पत्तेरिति । एतेन श्रीमदष्टाक्षरमन्त्रे शरणागतिः प्रतिपाद्यते । इत्थं संघटितः पदैस्त्रिभिरसावेकद्विपञ्चाक्षरैरर्थैस्तत्त्वहितप्रयोजनमयैरध्यात्मसारैस्त्रिभिरिति[1] नमसः प्रपत्तिरूपेष्टसाधनपरत्वोपगमादिति निरस्तम् । नमस्कारवाचिनः नमसः प्रपत्तिवाचित्वे प्रमाणाभावात् । अन्यथा नमो

1. नमसः प्रपत्तिरूपसाक्षान्मोक्षसाधनपरत्वमित्यपि निरस्तमिति पाठान्तरम् ।

हिरण्यबाहवे इत्यादावपि तद्वाचित्वं स्यात् । एतेन

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज ।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ।

इत्यादिगीतावचनैः,

सकृदेव प्रपन्नाय तवास्मीति च याचते ।
अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतंमम ॥

इत्यादिश्रीमद्रामायणवचनैः,

तावदार्तिस्तथा वाञ्छा तावन्मोहस्तथाऽसुखम् ।
यावन्नायाति शरणं त्वामशेषाघनाशनम् ॥

इत्यादिपुराणवचनैश्च प्रपत्तिसिद्धिरिति निरस्तम् । तद्वचनैः प्रपत्तिस्वरूप-सिद्धावपि तत्र साक्षान्मोक्षसाधनत्वे तेषामप्रमाणत्वात् । एवम्

आनुकूल्यस्य संकल्पः प्रातिकूल्यस्य वर्जनम् ।
रक्षिष्यतीति विश्वासः गोप्तृत्ववरणं तथा ॥
आत्मनिक्षेपकार्पण्ये षड्विधा शरणागतिः ।
अनया च प्रपत्त्यामामाकिञ्चिन्यैकपूर्वकम् ॥
मां माधव इति ज्ञात्वा मां गच्छेच्छरणं नरः ।
एवं मां शरणं गच्छन् कृतकृत्यो भविष्यति ॥

इत्यादीनि श्रीपञ्चरात्रवचनान्यपि व्याख्यातानि । तस्मात्परमते भक्तेरेव मोक्षसाधनत्वमुपेयम् । नतु प्रपत्तेरिति स्थितम ।

किञ्च ध्यानरूपा भक्तिरपि न मोक्षसाधनम् । किन्तु तज्जन्यसाक्षात्कारः । न च ब्रह्मसाक्षात्कारः ब्रह्मध्यानजन्यः[1] मोक्षहेतुश्चेत्यत्र प्रमाणाभावः शंक्यः । ध्याननिर्मथनाभ्यासादेवं पश्येन्निगूढवत् । ततस्तु तं पश्यते निष्कलं ध्यायमानः । भिद्यते हृदयग्रन्थिच्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्यकर्माणि तस्मिन् दृष्टे परावरे । इत्यादिश्रुतीनां सत्त्वात् । ननु ब्रह्मसाक्षात्कारः किंजन्यः । न तावद्वे-

1. ब्रह्मज्ञानजन्यः इति पा.

दान्तजन्यः । मृषावादिनेव त्वया शाब्दापरोक्षानभ्युपगमात् । नापि चक्षुरादिबाह्येन्द्रियजन्यः । न चक्षुषा गृह्यते नापि वाचा इत्यादिना चक्षुरादिग्राह्यत्वनिषेधात् । न च निषेधो योगप्रणिधानाद्यसहकृतचक्षुरादिविषय इति युक्तम् । बाह्येन्द्रियोपरमेऽपि योगिनो[1] ब्रह्मसाक्षात्कारोपगमात् । नापि मनोजन्यः । बहिर्विषये मनसः स्वातन्त्र्याभावात् । अन्यथा धर्मादीनामपि मानससाक्षात्कारविषयत्वापातात् । न च धर्मादीनां नित्यातीन्द्रियतया तदविषयत्वमिति युक्तम् । ब्रह्मणोऽपि संसारकालेऽपि अव्यक्तस्वभावतया तद्विषयत्वायोगात् । मनसः प्रमाणसहकारित्वेन प्रमाणत्वायोगाच्च । नचैवं 'दृश्यते त्वग्रया बुध्या । मनसैवानुद्रष्टव्यं' इत्यादिश्रुतिविरोधः शङ्क्यः । दृशिधातोः चाक्षुषज्ञानवाचितया मनसस्तदजनकत्वेन व्याहतार्थतया 'यन्मनसा न मनुते' इत्यादिश्रुत्यन्तरानुसारेण च तथाविधश्रुतीनां अन्यथाव्याख्येयत्वात् । न च दृशिधातोः साक्षात्कारमात्रपरत्वान्न व्याहतिरिति युक्तम् । तथा सति ज्ञानमात्रपरत्वेनापि सङ्कोचप्रसङ्गात् । नापि ध्यानजन्यः । ध्यानेन साक्षात्कारायोगात् । अन्यथा धर्मादिध्यानेनापि तत्साक्षात्कारापातात् । न च विधुरस्य कामिनीध्यानेन तत्साक्षात्कारोऽस्तीति तद्वत् ब्रह्मसाक्षात्कारोऽप्यस्त्विति युक्तम् । नैयायिकमते स्वाप्नज्ञान इव कामिनीध्याने साक्षात्त्वव्यवहारोपपत्तौ विधुरस्य कामिनीविषयकस्य तत्साक्षात्कारस्य अनङ्गीकार्यतया तद्दृष्टान्तेन ब्रह्मसाक्षात्कारसिद्धिरित्यस्यायोगात् । न च ब्रह्मविषयसाक्षात्काराभावे बन्धाविच्छेदःस्यादिति शंक्यम् । ध्यानेन तद्विच्छेदसम्भवत् । तथा च श्रुतिः आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिः । स्मृतिलम्भे[2] सर्वग्रन्थीनां विप्रमोक्ष इत्यादिका । न चैवं द्रष्टव्य इति श्रवणमननध्यानातिरिक्तं दर्शनं न प्रतिपादनीयमिति वाच्यम् । उक्तरीत्या परमात्मदर्शनस्यायोगेन द्रष्टव्य इत्यस्य ध्याने दर्शनसमानाकारत्वविधिपरत्वात् । ध्याने दर्शनसमानाकारत्वं च वैशद्यरूपमिति न किञ्चिदनुपपन्नमिति । उच्यते ।

---

1. योगस्थस्येति पाठान्तरम् ।
2. स्मृतिलाभे इति पाठान्तरम् ।

न तावद्ब्रह्मसाक्षात्कारे कारणदौर्घट्यम् । त्वयापि योगजसाक्षात्काराभ्युपगमेन कार्यानुरोधेन कारणस्य कल्पनीयत्वात् ।

ननु योगिप्रत्यक्षं रामानुजाचार्यैः शास्त्रयोन्यधिकरणे निराकृतम् । इत्थं हि तत्र भाषितम् । "ननु शास्त्रयोनित्वं ब्रह्मणो न संभवति, प्रमाणान्तरवेद्यत्वाद्ब्रह्मणः । अप्राप्ते तु शास्त्रमर्थवत् । किन्तर्हि तत्र प्रमाणम् । नतावत् प्रत्यक्षम् । तद्धि द्विविधम्, इन्द्रियसंभवम् योगसंभवं चेति । इन्द्रियसंभवं च बाह्यसंभवम्, आन्तरसम्भवञ्चेति द्विधा । बाह्येन्द्रियाणि विद्यमानसन्निकर्षयोग्यस्वविषयबोधजननानीति न सर्वार्थसाक्षात्कारतन्निर्माणसमर्थपुरुषविशेषविषयबोधजननानि । नाप्यान्तरम्, आन्तरसुखदुःखादिव्यतिरिक्तबहिर्विषयेषु तस्य बाह्येन्द्रियानपेक्षप्रवृत्त्यनुपपत्तेः । नापि योगजन्यम्; भावनाप्रकर्षपर्यन्तजन्मनस्तस्य विशदावभासत्वेऽपि पूर्वानुभूतविषयस्मृतिमात्रत्वान्न प्रामाण्यमिति कुतः प्रत्यक्षता; तदतिरिक्तविषयत्वे कारणाभावात् । तथा सति तस्य भ्रमरूपते"ति । एवं च नास्मत्प्रतिबन्दीति चेत् सत्यम् । तथाविधस्य त्वदीयभाष्यवाक्यस्य मतान्तरत्वेन निर्वाह्यत्वात् । अत एव वेदान्ताचार्यैः न्यायपरिशुद्धावुक्तम् "अस्मदादिप्रत्यक्षं द्विधा, योगिप्रत्यक्षमयोगिप्रत्यक्षं चेति । तत्र योगिप्रत्यक्षं प्रकृष्टादृष्टविशेषजम् । तत् युक्तावस्थायां मनोमात्रजमपि । वियुक्तावस्थायां तु बाह्येन्द्रियजन्यमपि । तच्च बुभुत्सादिप्रतिनियतविषयं आगमैकसिद्धं च । भावनाबलजमात्रं जगत्कर्तरि प्रत्यक्षं प्रतिक्षिप्तं शास्त्रयोन्यधिकरणे । 'मत्तः स्मृतिर्ज्ञानमपोहनं चे'त्यादौ भाष्ये 'ज्ञानमिन्द्रियलिङ्गागमयोगजो वस्तुनिश्चयः' इति अन्यत्र भाष्यकारैरेव साक्षाद्योगिप्रत्यक्षस्य कण्ठोक्तेः, तस्य सम्भवतोऽप्यागमिकेश्वरज्ञानमूलागमानुवादत्वापादनाशङ्कया तत्रौदासीन्यात्" इति । तथा शतदूषण्यामपि शब्दजन्यप्रत्यक्षभङ्गे 'यत्तु भाष्ये दर्शनसमानाकारत्वमुच्यते तन्मोक्षसाधनीभूतायाः ध्रुवानुस्मृतेरेव न पुनर्धर्मफलीभूतयोगिप्रत्यक्षं निषिध्यते । तत्सर्वं धर्मवीर्येण यथावत्सम्प्रपश्यतीत्यादौ तस्यापि श्रुतत्वादिति । एवं च ब्रह्मसाक्षात्कारो योगजधर्मसहकृतमनोजन्यः त्वन्मतेऽप्यस्तीति तस्यैव बन्धनिवर्तकत्वमप्यस्तु,

न तु दर्शनसमानाकारस्य ध्यानस्य, परोक्षज्ञानरूपे ध्याने वैशद्यस्य कथमप्ययोगात्। यद्यपि सामीप्यादितारतम्येन अपरोक्षज्ञाने वैशद्यतारतम्यं दृष्टम्। तथापि न परोक्षज्ञाने तद्दृष्टमिति ब्रह्मसाक्षात्कार एव मोक्षसाधनमिति स्थितम्।

किञ्च ब्रह्मानन्दानुभवो मोक्ष इत्यनुपपन्नम्। स्वानन्दानुभवस्यैव पुरुषार्थत्वात्। ननु ब्रह्मानन्दोऽपि स्वीयानन्द एव। आनन्दस्य स्वीयत्वं च स्वप्राप्यत्वं न तु स्वाभिन्नत्वं, स्वर्गादिसुखस्यापुरुषार्थत्वापातात्। त्वया स्वर्गसुखस्य जन्यत्वोपगमेन स्वरूपभिन्नत्वात्। नापि स्ववृत्तित्वम्। स्वरूपसुखस्य अपुरुषार्थत्वापातात्। स्वस्य स्ववृत्तित्वाभावात्। तथा च ब्रह्मानन्द एव पुरुषार्थः। न च ब्रह्मण आनन्दरूपत्वे विवादोऽस्ति। नित्यं विज्ञानमानन्दं ब्रह्म यदेष आकाश आनन्दो न स्यात् इत्यादिश्रुतेः। न च ब्रह्मानन्दस्य मुक्तप्राप्यत्वे प्रमाणाभावः। रसं ह्येवायं लब्ध्वानन्दीभवति इत्यादिश्रुतीनां सत्त्वादिति चेन्न। 'एवमेवैष सम्प्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते' इति श्रुतौ ब्रह्मप्राप्तिहेतुकस्वरूपानन्दाविर्भावस्य पुरुषार्थत्वप्रतिपादनेन रसं ह्येवायं लब्ध्वानन्दीभवति इत्यादिश्रुतेरपि तदनुसारेण नेयत्वात्। तथा च पारमर्षं सूत्रं "सम्पद्याविहाय स्वेन शब्दादिति"। स्वीयत्वं च स्वसम्बन्धित्वं तच्च मोक्षे अभिन्नतया स्वर्गादौ स्ववृत्तितयेत्यन्यदेतत्। न च स्वसम्बन्धित्वमतिप्रसक्तम्। कार्यानुरोधेन तस्य कल्पनेन तदभावस्थले तस्यासिद्धेः। न च स्वरूपानन्दाविर्भावस्यासाध्यतया अपुरुषार्थत्वम्। दुःखहेतूच्छेदविशिष्टतया स्वरूपानन्दस्य साध्यत्वोपगमात्। हेतूच्छेदे पुरुषव्यापार इत्यभ्युपगमात्। न च यस्य पुरुषार्थत्वं न तस्य साध्यत्वं, यस्य च साध्यत्वं न तस्य पुरुषार्थत्वमिति वाच्यम्। ब्रह्मानन्दस्य पुरुषार्थत्वमभ्युपगच्छतः तत्रापि एतद्दोषसाम्यात्। कण्टकादिनिवृत्तिवद्दुःखहेतूच्छेदस्यापि पुरुषार्थत्वोपगमाच्च। न चैवं स्वरूपसुखस्य पुरुषार्थत्वाङ्गीकारो व्यर्थ इति वाच्यम्। प्रमाणप्रतिपन्नस्य तस्य त्यागायोगात्। यदि नैयायिकादिवद्वयं यत्किञ्चित्परिकल्पयामः तदा पर्यनुयोज्या भवेम। तस्मात् दुःखहेतूच्छेदविशिष्ट-

स्वरूपानन्दाविर्भावो मोक्ष इति पक्षे बाधकाभावात् साधकसद्भावाच्च ब्रह्मानन्दानुभवो मोक्ष इति पक्षे साधकाभावात् बाधकसत्त्वाच्च द्वितीयपक्षः सर्वात्मना अनुपपन्न इति स्थितम् ।

किञ्च आनन्दावाप्तिलक्षणस्य मोक्षस्य एकाकारत्वमित्ययुक्तम् । स्वर्गादिपुरुषार्थानामिव मोक्षस्यापि तरतमभावापन्नत्वात् । न चास्तु साधनतारतम्यात् स्वर्गादिफलतारतम्यम् । न तु मोक्षतारतम्यम् । ब्रह्मसाक्षात्काररूपस्य साधनस्य सर्वान् प्रति एकरूपत्वादिति वाच्यम् । नियतगुणकध्यातब्रह्मविषयकसाक्षात्कारस्यापि नियतत्वेन तारतम्यात् । सर्वगुणोपेतं ब्रह्म ध्यातव्यमित्यस्याशक्यत्वात् । मुख्याधिकारिणां शक्यत्वेऽपि सर्वाधिकारिसाधारण्यस्यैव वक्तव्यत्वात् । गुणभेदेन विद्याभेदस्य अङ्गीकृतत्वाच्च । त्वन्मते भक्तिप्रपत्त्योः तरतमभावापन्नत्वेन तत्साध्यमोक्षतारतम्यावश्यंभावाच्च । न चैवं 'परमं साम्यमुपैती'ति श्रुतिविरोधः । दुःखाभाववत्त्वेन भगवत्साम्योपपत्तेः । अन्यथा त्वन्मते कारणत्वादिनापि साम्यापत्तेः । जगद्व्यापारवर्जमितिसूत्रानुसारेण तद्व्यतिरिक्तधर्मेण साम्यमित्यङ्गीकारे आनन्दांशेऽपि संकोचोऽस्तु । न च भोगमात्रसाम्यलिङ्गाच्च इति सूत्रे मुक्तस्य सकलभोगसाम्यमुच्यत इति तद्विरोध इति वाच्यम् । तत्र त्वन्मते अस्मन्मते च मात्रशब्दस्यावधारणपरतया कार्त्स्न्यार्थत्वाभावेन विरोधाभावात् ।

किञ्च आनन्दवल्ल्यां 'श्रोत्रियस्य चाकामहतस्य । ते ये शतं देवगन्धर्वाणामानन्दाः' इति मुक्तानां तरतमभावापन्नमनुष्यगन्धर्वाद्यानन्दसमानानन्दवत्त्वावेदनान्मुक्तौ तारतम्यं दुर्वारम् । अकामहतः श्रोत्रियो मुक्तः इति त्वयाभ्युपगमात् । न च सर्वत्र श्रोत्रिय एको ब्रह्मानन्दतुल्यानन्दः, तत्र मनुष्यगन्धर्वाद्यानन्दसमानानन्दप्रतिपादनन्तु एकदेशानुवाद इति वाच्यम् । अपूर्वार्थत्वे सम्भवति अनुवादत्वाङ्गीकारायोगादित्यन्यत्र विस्तरः । तस्मान्मोक्षस्य एकाकारत्वमनुपपन्नम् ॥

किञ्च अर्चिरादिगतिप्राप्यो वैकुण्ठलोकोऽण्डाद्बहिर्भूत इति त्वन्मतम् । तदयुक्तम् । तथात्वे प्रमाणाभावात् । तस्याण्डान्तर्गतेः वक्तव्यत्वाच्च । वैकुण्ठस्याण्डान्तर्गतत्वेऽपि नित्यत्वग्राहकप्रमाणानुसारेण नित्यत्वोपपत्तेश्च ॥ ननु वैकुण्ठलोकस्याण्डाद्बहिर्भूतत्वे श्रुतीतिहासपुराणवचनानि दृश्यन्ते । तथाहि सुबालोपनिषदि तावत् [1]षष्टेऽनुशासने "अथ हैनं रैकः पप्रच्छ। भगवन् योऽयं विज्ञानघन उत्क्रामन् स केन कतरद्वाव स्थानं उत्सृज्य प्राक्रामतीति रैकप्रश्न-मुपक्षिप्य तस्मै सहोवाच । हृदयस्य मध्ये लोहितं मांसपिण्डं, यस्मिंस्तद्दहरं पुण्डरीकं कुमुदमिव अनेकधा विकसितम् । तस्य मध्ये समुद्रः । समुद्रस्य मध्ये कोशः । तस्मिन्नाड्यश्चतस्रो भवन्ति । रमाऽरमेच्छाऽपुनर्भवेति । तत्र रमा पुण्येन पुण्यलोकं नयति । अरमा पापेन पापम् । इच्छया यत् स्मरति तदभिसम्पद्यते इत्यादिना नाडीत्रयोपयोगमुक्त्वा, अपुनर्भवया कोशं भित्त्वा शीर्षकपालं भिनत्ति । शीर्षकपालं भित्त्वा पृथिवीं भिनत्ति । पृथिवीं भित्त्वा अपो भिनत्ति । अपो भित्त्वा तेजो भिनत्ति । तेजो भित्त्वा वायुं भिनत्ति । वायुं भित्त्वाकाशं भिनत्ति । आकाशं भित्त्वा मनो भिनत्ति । मनो भित्त्वा भूतादिं भिनत्ति । भूतादिं भित्त्वा महान्तं भिनत्ति । महान्तं भित्त्वाव्यक्तं भिनत्ति । अव्यक्तं भित्त्वा अक्षरं भिनत्ति । अक्षरं भित्त्वा मृत्यु भिनत्ति । मृत्युर्वै परे देवे एकीभवती"त्यादिना अपुनर्भवाशब्दितया मूर्धन्यनाड्या निष्क्रान्तस्य ब्रह्मज्ञानिनः पृथिव्यप्तेजोवाय्वाकाशमनोऽहङ्कारमहत्प्रकृत्यादि-क्रमेणातिक्रमणमुच्यते । न चैतत् सर्वमौपचारिकमिति शंक्यम् । शास्त्रैकवेद्ये यथाशास्त्रमङ्गीकार्यत्वात्[2] । न चोदाहृतं वाक्यं संसारिविषयम् । तस्यैतादृश-सामर्थ्याभावात् । न च पृथिवीं भिनत्तीत्यादिकमपि देहमात्रविषयम् । कोशं भित्त्वा शीर्षकपालं भिनत्ति इति देहान्निष्क्रमणस्य पूर्वमेवोक्तत्वात् । न च पृथिवीं भिनत्तीत्यादिकं ज्ञानिनः पृथिव्यादिसकलतत्त्वावश्यत्वप्रतिपादन-

1. सुबालोपनिषदि एकादशखण्डे ।
2. अलौकिकार्थस्य मानान्तरविरोधाभावे यथाशास्त्रमंगीकार्यत्वादिति पा.

परमिति युक्तम् । शीर्षकपालसूर्यमण्डलादिभेदनस्याप्यसिद्धयापातात् । सूर्यद्वारेण ते विरजाः प्रयान्ति । यो भित्त्वा सूर्यमण्डलमित्यादिश्रुतिस्मृतीनां यथाश्रुतार्थपरत्ववत् उदाहृतवाक्यस्यापि तथात्वोपपत्तेश्च ॥

किञ्च आदित्यवर्णं तमसस्तु पारे । आदित्यवर्णं तमसः परस्तात् । क्षयंतमस्य रजसः पराके । त्वं हि नः पिता योऽस्माकमविद्यायाः परं पारं तारयसि, तस्मै मृदितकषायाय तमसः पारं दर्शयति भगवान् सनत्कुमारः इत्यादिभिः श्रुतिभिः मुक्तप्राप्यस्य ब्रह्मणः तमसः पारवर्तित्वं प्रतिपाद्यते । नचोदाहृताः श्रुतयः प्रकृतेः ब्रह्मणश्च वैलक्षण्यप्रतिपादनपराः, ब्रह्मणः प्रकृत्यपेक्षया उत्तमत्वप्रतिपादनपरा वा, प्रकृत्यवश्यत्वप्रतिपादनपरा वेति युक्तम् । सर्वस्वरससिद्धार्थत्यागे मानाभावात् ॥

किञ्च मोक्षधर्मे प्राकृतप्रकृत्यतीतदेशावच्छेदेनैव ब्रह्मणो मुक्तप्राप्यत्वं प्रतिपाद्यते । "तीर्त्वा तु दुस्तरं जन्म विशन्ति विमलं नभः । ततस्तान् सुकृतीन् सांख्यान् सूर्यो वहति रश्मिभिः ॥ पद्मतन्तुवदाविश्य प्रवहन् विषयान्नृप । तत्र तान् प्रहितो वायुः प्रतिगृह्णाति भारत ॥

वीतरागान् यतीन् सिद्धान् ज्ञानयुक्तांस्तपोधनान् ।
सूक्ष्मः शीतस्सुगन्धिश्च सुखस्पर्शश्च भारत ॥
सप्तानां मरुतां श्रेष्ठो लोकान् गच्छति यः शुभान् ।
स तान् वहति कौन्तेय तमसः परमां गतिम् ॥
तमो वहति लोकेश रजसः परमां गतिम् ।
रजो वहति राजेन्द्र सत्त्वस्य परमां गतिम् ॥
सत्त्वं वहति शुद्धात्मा परं नारायणं प्रभुम् ।
प्रभुर्वहति शुद्धात्मा परमात्मानमात्मना ॥
परमात्मानमासाद्य तद्भूता यतयोऽमलाः ।
अमृतत्वाय कल्पन्ते न निवर्तन्ति चाभि भोः ॥

आत्मा केवलतां प्राप्तः यत्र गत्वा न शोचति ।
ईदृशं परमं स्थानं निरयाते च मादृशाम् ॥

तथा ॥

प्रकृतिञ्चाप्यतिक्रम्य गच्छन्त्यात्मानमव्ययम् ।
परं नारायणात्मानं निर्द्वन्द्वं प्रकृतेः परम् ॥
विमुक्तः पुण्यपापेभ्यः पुरुषस्तमनामयम् ।
परमात्मानमगुणं न निवर्तन्ति भारते"ति ॥

नचोदाहृतैः[1] प्रमाणैः मुक्तप्राप्यलोकस्य चतुर्मुखलोकोर्ध्वदेशस्थत्वप्रतीतेः अण्डान्तर्भावावश्यंभाव इति वाच्यम् । तस्य अण्डाद्बहिष्ठत्वेऽपि तदूर्ध्वत्वोपपत्तेः । अण्डान्तर्गतविष्णुलोकान्तरसत्त्वेऽपि अर्चिरादिगतिप्राप्यविष्णुलोकस्य अण्डाद्बहिर्भावावश्यंभावात् । अन्यथा उदाहृतश्रुतिभारतवचनासामाञ्जस्यं स्यादिति । तथा पाद्मोत्तरखण्डे द्वात्रिंशेऽध्याये वैकुण्ठलोकोऽण्डाद्बहिर्भूत इति बहुधा प्रतिपादितः । तत्रहि

एवं प्राकृतरूपस्य विभूते रूपमुच्यते ।
त्रिपाद्विभूते रूपं तु शृणु भूधरनन्दने ॥
प्रधानपरमव्योम्नोरन्तरे विरजानदी ।
वेदाङ्गस्वेदजनिततोयैः प्रस्राविता शुभा ॥
तस्याः पारे परव्योम त्रिपाद्भूतिः सनातनी ।
अमृतं शाश्वतं नित्यमनन्तं परमं पदम् ॥
शुद्धसत्त्वमयं दिव्यं अक्षरं ब्रह्मणः पदम् ।
अनेककोटिसूर्याग्नितुल्यवर्चसमव्ययम् ।
सर्ववेदमयं शुभ्रं सर्गप्रलयवर्जितम् ।
असंख्यमजरं नित्यं जाग्रत्स्वप्नादिवर्जितम् ।

---

1. न च पूर्वोदाहृतश्रुतिस्मृतिभिः इति पाठान्तरम् ।

हिरण्मयाक्षरपदं ब्रह्मानन्दसुखाह्वयम् ।
समानाधिकराहित्यं आद्यन्तरहितं शुभम् ॥
तेजसात्यद्भुतं रम्यं नित्यमानन्दसागरम् ।
एवमादिगुणोपेतं तद्विष्णोः परमं पदम् ।
न तद्भासयते सूर्यो न शशाङ्को न पावकः ।
यद्गत्वा न निवर्तन्ते तद्धाम परमं हरेः ॥

इत्यादीनि आध्यायपरिसमाप्ति बहूनि वचनानि दृश्यन्ते। तस्माद् वैकुण्ठलोकस्याण्डाद्बहिर्भावोऽवश्यमङ्गीकरणीय इति ॥

अत्रोच्यते ॥ न तावत्सौबालश्रुत्यनुसारेण मुक्तप्राप्यलोकस्य ब्रह्माण्डादावरणेभ्यश्च बहिर्भावसिद्धिः । तस्य ब्रह्माण्डान्तस्थत्वेऽपि पृथिव्यादितत्त्वभेदनस्य सर्वलोकसञ्चारार्थत्वेन अन्यथासिद्धत्वात् । अण्डान्तर्गतवैकुण्ठलोके विद्यमानस्यापि मुक्तस्य परमेश्वरसङ्कल्पानुसारिण्या स्वेच्छया सर्वलोकसंचारोपपत्तेः । तथा च श्रुतयः 'स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नात्मरतिरात्मक्रीड आत्ममिथुन आत्मानन्दः स स्वराड्भवति। तस्य सर्वेषु लोकेषु कामचारो भवति । अथ य इहात्मानं अनुविद्य सृजत्येतांश्च सत्यान् कामान् तेषु सर्वेषु लोकेषु कामचारो भवति । तद्य एवैतं ब्रह्मचर्येणानुविन्दन्ति तेषामेष ब्रह्मलोकः तेषां सर्वेषु लोकेषु कामचारो भवति । सोऽन्वेष्टव्यः स विजिज्ञासितव्यः । सर्वांश्च लोकानाप्नोति, सर्वांश्च कामान्, इमान् लोकान् कामान्नी कामरूप्यनुसञ्चरन्' इत्यादिकाः । न चाण्डान्तर्गतलोकेष्वेव मुक्तस्य सञ्चारप्रतिपादिका उदाहृतश्रुतयः इति युक्तम् । सङ्कोचकाभावात् । न चाण्डाद्बहिर्लोकानां एवाभावात् सङ्कोच इति युक्तम् । लोकशब्दस्य देशविशेषपरत्वात् । नैयायिकादिभिः दिक्पदार्थत्वेन अस्माभिः अव्याकृताकाशशब्दार्थत्वेन अङ्गीकृतस्य देशस्य विभुत्वेन सर्वत्र सुलभत्वात् । तस्मात् सौबालवाक्यं मुक्तस्याण्डाद्बहिरपि सञ्चारप्रतिपादनपरं न तु वैकुण्ठलोकस्याण्डाद्बहिस्सत्वप्रतिपादनपरम् । यद्वा पृथिवीं भिनत्तीत्यादिकं पृथिव्यादिषु मुक्तस्य

वैराग्यप्रतिपादनपरम् । न तु पृथिव्यादिदेशाद्देशान्तरगमनपरम् । यथा भूलोकं भुवर्लोकं सुवर्लोकं जनोलोकं तपोलोकं च अतलवितलसुतलरसातलतलातलमहातलपातालान् ब्रह्माण्डं च विसर्जयेदित्यादिकं भूलोकादिष्वासक्त्यभावप्रतिपादनपरं न तु सर्वात्मना तत्त्यागपरम् । भूलोकादीनां सन्न्यासिना त्यक्तुमशक्यत्वात् तद्वत् । न च ज्ञानिनः पृथिव्यादिभेदने सामर्थ्यमस्तीति वैषम्यमिति युक्तम् । पृथिवीं भिनत्तीत्यादेः अन्यथासिद्धत्वेन ज्ञानिनः तादृशसामर्थ्यस्य अकल्पनीयत्वात् । न च कोशं भित्वा शीर्षकपालं भिनत्तीत्यत्रापि च विदारणं न सिध्येदिति वाच्यम् । व्यपोह्यशीर्षकपाले, भूरित्यग्नौ प्रतितिष्ठतीतिश्रुत्यन्तरानुसारेण तत्र मुख्यार्थाङ्गीकारोपपत्तेः ॥

किञ्च आदित्यवर्णं तमसस्तु पारे । आदित्यवर्णं तमसः परस्तात् । क्षयन्तमस्य रजसः पराके इति श्रुतित्रयेणापि ब्रह्मणः तमसः पारवर्तित्वमेव प्रतिपाद्यते न तु मुक्तप्राप्यलोकस्य । सर्वेभ्यो लोकेभ्यो ज्यायान् । अतो ज्यायांश्च पूरुषः । इत्यादिश्रुत्या अस्माभिः ब्रह्मणः सर्वस्मात् ज्यायस्त्वोपगमात् । न च प्रकृतिसम्बन्धरहितदेशस्यैव परमपदशब्दार्थत्वेन तदवच्छिन्नब्रह्मण एव मुक्तप्राप्यत्वमिति अस्मदिष्टसिद्धिरिति वाच्यम् । प्रकृतिसम्बन्धरहितदेशस्यैवमुक्तप्राप्यत्वे प्रमाणाभावात् । वश्यप्रकृतित्वस्यैव मुक्तिशब्दार्थत्वात् । प्रकृतेः व्यापकत्वेऽप्यण्डान्तःप्रदेशे वैकुण्ठलोकप्रदेशावच्छेदेन प्रकृतिसम्बन्धराहित्योपपत्तेश्च । यद्वा ब्रह्मवत्तमश्शब्दितप्रकृतेः अपि विभुत्वाभ्युपगमेन तमसस्तु पार इत्यादीनां ब्रह्मणः प्रकृत्यपेक्षया उत्तमत्वप्रतिपादनपरत्वेऽपि न किञ्चिदनुपपन्नम् । वस्तुतस्तु नात्र तमःशब्देन प्रकृतिरुच्यते किन्तु अन्धकारः । तमोलोकादस्मदभिमतवैकुण्ठस्यापि परत्वमस्तीति न किञ्चिदनुपपन्नम् । नन्वविद्यायाः परं पारं तारयसीति प्रकृतिसम्बन्धरहितदेशावच्छेदेन ब्रह्मणो मुक्तप्राप्यत्वं श्रूयत इति चेन्न । तत्राविद्याशब्दितप्रकृतिं प्रति परमाधारभूतब्रह्मण एव मुक्तप्राप्यत्वप्रतिपादनात् । तत्र पारशब्दस्याधारपरत्वात् । ब्रह्मणो मुख्यपारत्वायोगात् । अन्यथा एतं सेतुं तीर्त्वेत्यादिश्रुत्यनुसारेण ब्रह्मान्यस्यापि

मुक्तप्राप्यत्वापत्तेः । तत्र तीर्त्वैल्यस्य प्राप्तिमात्रपरत्वे प्रकृतेऽपि तथास्तु । एतेन तमसः पारं दर्शयतीत्यादिश्रुतिरपि व्याख्याता । स तान् वहति कौन्तेय तमसः परमां गतिम् इत्यादिभारतवचनानि च इन्द्रियेभ्यः पराह्यर्थाः इत्यादिवन्नारायणस्यैव परमप्राप्यत्वप्रतिपादनपराणि । प्रकृतिं चाप्यतिक्रम्य गच्छन्त्यात्मानमव्ययम् इत्यादिना प्रकृत्यतिक्रमणोक्तिरपि प्रकृत्यवश्यत्वप्रतिपादनपरेति न किञ्चिदनुपपन्नम् । प्रधानपरमव्योम्नोरन्तरे विरजानदी । तस्याः पारे परव्योम त्रिपाद्भूतिः सनातनी इत्यादिपाद्मवचनान्यपि अण्डान्तर्गतवैकुण्ठलोकस्य प्रकृतिसम्बन्धराहित्यप्रतिपादनपराणीति न कश्चित् दोष इति स्थितम् ॥

एवं कर्मब्रह्ममीमांसयोः एकप्रबन्धत्वम्, अध्ययनविधेरक्षरावाप्तिपर्यन्तत्वं, श्रवणमननयोरविधेयत्वं, भ्रमस्थले पञ्चीकरणप्रक्रियया रजतादेः सत्त्वम्, स्वाप्नपदार्थस्य बहिस्सृष्टत्वं,[1] दर्पणे मुखमित्यादौ परावृत्त्यग्रहणं, ब्रह्मणः तच्छरीरस्य ज्ञानानन्दादिगुणानां च अत्यन्तभेदः, ब्रह्मणोऽप्यनित्यज्ञानेच्छादिसद्भावः, भगवत्प्रीतिकोपयोरेव धर्माधर्मरूपत्वं, वर्णानामुत्पत्तिविनाशौ, संसर्गाभावस्याधिकरणस्वरूपत्वं, इत्येवमादीनि तन्मतसिद्धप्रमेयान्तराणि निरसनीयानि । तन्निरासप्रकारश्च ग्रन्थान्तरे द्रष्टव्यः ॥

एवं रामानुजमतनिराकरणेन श्रीकण्ठमतमपि निरस्तं वेदितव्यम् । तन्मतस्य प्रायेण रामानुजमतप्रक्रियामनुसृत्यैव प्रवृत्तेः । यद्यपि प्रक्रियान्तरमपि तत्राङ्गीकृतम् । तथापि तद्दूषणे नातिप्रयोजनम् । यद्यपि शिवस्यैव परमकारणत्वं, नारायणस्य तु चिच्छक्तिशकलरूपत्वं च सिद्धान्तविरुद्धं तत्र प्रतिपादितम् । तदुपपाद्य न निराकृतम् । तथापि पाशुपतमतनिराकरणे नारायणस्यैव परमकारणत्वं विस्तरेणोपपादितमित्युपरम्यते ।

इति श्रीमत्परमहंसपरिव्राजकाचार्याणां श्रीमत्सुरेन्द्रतीर्थपूज्यपादानां शिष्येण सर्वतन्त्रस्वतन्त्र श्रीविजयीन्द्रभिक्षुणा विरचिते सर्वसिद्धान्तसारासारविवेचने रामानुजश्रीकण्ठमतनिरासो नाम दशमः परिच्छेदः ॥

1. बहिर्ब्रह्मसृष्टत्वम् इति पाठान्तरम् ।

श्रीमद्विजयीन्द्रतीर्थविरचितसर्वसिद्धान्तसारासारविवेचने रामानुजमत-निरासनामकदशमपरिच्छेदे समुदाहृतप्रमाणानामाकरसूची

पुटम्	प्रमाणम्	आकरः
२	द्रव्याद्रव्यप्रभेदात्	तत्त्वमुक्ताकलापः जडद्रव्यसरः श्लो. ६
२	तत्र द्रव्यं दशावत्	,, ,, ,, ७
३	प्रारब्धेतरपूर्वपापमखिलम्	रहस्यत्रयसारः
४	यस्य वेदाः शरीरम्	अन्तर्यामिब्राह्मणम्
४	तस्य प्रकृतिलीनस्य	नारायणपन्नम्
४	मायां तु	श्वेताश्वतर अ. ४ मं. १०
४	वाचा विरूप नित्यया	ऋ. सं. ८-६-७७
४	सहस्रधायावद्ब्रह्मविष्ठितं तावती वाक्	ऋ. सं. मं. १० सू. ११४ मं. ८
४	यावान्वायमाकाशः	छान्दोग्यम्
४	स यथाऽनन्तरोऽयमाकाशः	
४	गगनं गगनाकारं	वा. रा. युद्धकां. अ. १० श्लो. २४
४	आकाशादेव समुत्पद्यन्ते	छां. अ. १ खं. ९
५	चतुर्विंशतिसंख्यातमव्यक्तम्	मन्त्रिकोपनिषत्
५	यत्कृष्णं तदन्नस्य	छां. अ. ६ खं. ४
५	कालःस्वभावो नियतिः	श्वेत. अ. १ मं. २
५	नदीव प्रभवात् काचित्-निवर्तते	कृष्ण. य. आरण्यके प्रपाठकः १ अनु. २
६	तमसः परस्तात्	कृष्ण. य. प्रपा. ३ अनु. १३
६	सत्त्वखल्वीरितं-प्रयाति	मैत्रायणीयोपनिषत्
६	ससर्ज भगवानादौ	पुराणम्
७	अजामेकां	श्वे. अ. ४ मं. ७
७	अजाह्येका (ज्ञाज्ञौद्वावजौ)	श्वे. अ. १ मं. १
७	गौरनाद्यन्तवती	मैत्रिकोपनिषत् मं. ६
७	क्षरं प्रधानम्	श्वे. अ. १ मं. १०

पुटम्	प्रमाणम्	आकरः
७	एकमेवाद्वितीयम्	छां. अ. ६
७	(विश्वतः) द्यावाभूमी जनयन्	ऋ. सं. मं. १०-८१-३ अथर्व १३-२-२६ तै. सं. ४-६-२-४ तै. आ. १०-१-३
७	भूमिरापोऽनलो वायुः	गीता
८	महान्तं च समावृत्य	
८	शब्दस्पर्शविहीनं-प्रभवाप्ययम्	
९	संयोगवेगप्रयत्नाभावे गुरुत्वात् पतनम् (संयोगाभावे गुरुत्वात् पतनम्)	वैशे. सूत्रम्
९	आद्यपतनासमवायिकारणं गुरुत्वम्	तर्कसंग्रहः
१३	यस्यात्मा शरीरम्	बृ. उ.
१३	यस्याव्यक्तं शरीरम्	,,
१३	यः पृथिव्यां तिष्ठन्-यं पृथिवी न वेद	बृ. उ.
१३	स्वे महिम्नि प्रतिष्ठितः	छां. अ. ७ खं. २४
१३	मायाधारो निराधारः	
१३	न चाहं तेष्ववस्थितः	गीता
१३	(अग्निःकोपः) जगत्सर्वं शरीरं ते	वा. रा. युद्ध. अ. १२० श्लो. २६
१४	यतो वा इमानि	तै. उ.
१४	आत्मन आकाशः संभूतः	तै. उ.
१४	आनन्दाद्ध्येव खल्विमानि	तै. उ.
१४	अक्षरात्संभवतीह विश्वम्	मुण्डक.
१४	एतस्माज्जायते प्राणः	,,
१४	तस्मादेतद् ब्रह्म नामरूपमन्नं च जायते	,,
१४	सप्तप्राणाः प्रभवन्ति	,,
१४	नारायणादेव समुत्पद्यन्ते	नारायणोपनिषत्
१४	जनिकर्तुः प्रकृतिः	अष्टाध्यायी
१५	अन्नात्प्राणा भवन्ति-ब्रह्मयोनिः	तै. आ. प्रपा. ४ अनु. ७९

पृष्ठम्	प्रमाणम्	आकरः
५	पुत्रात् प्रमोदो जायते	महाभाष्यम्
५	तदशिष्यं संज्ञाप्रमाणत्वात्	अष्टाध्यायी
५	नत्वात्	महाभाष्यम्
५	आकाशाद्वायुः	तै. उ.
५	तस्य धीराः परिजानन्ति योनिम्	पु. सू.
५	मम योनिर्महद्ब्रह्म	गीता
५	शास्त्रयोनित्वात्	ब्रह्मसूत्रम्
५	सर्वस्य कलहस्य स्त्री योनिः	लौकिकाभाणकः
५	पृथिवी योनिरोषधिवनस्पतीनाम्	
६	कर्तारमीशं पुरुषं ब्रह्मयोनिम्	मुंडक.
६	योनिष्ट इन्द्रसदने	ऋग्वेदः ७-२४-१ साम. ३१४
६	किंस्विद्वनं क उ स वृक्षआस	ऋग्वेदः १०-८१-४
६	ब्रह्मवनं ब्रह्म स वृक्ष आसीत्	२ अष्ट. ८ प्र. ७ अ. ७७
६	तस्मादेतद्ब्रह्म नाम रूपम्	मुंडक-
६	तासां ब्रह्म महद्योनिरहम्	गीता
६	यदध्यतिष्ठद्भुवनानि	ऋ. २ अष्ट. प्र. ८
६	ब्रह्माध्यतिष्ठद्भुवनानि	ऋ. २ अष्ट. ८ प्र. ७ अनु. ७८
७	सदेव सोम्येदमग्र आसीत्	छां. अध्याय ६
७	ब्रह्म वा इदमग्र आसीत्	बृ. उ. ३-४-११
७	आत्मा वा इदमेक एवाग्र आसीत्	ऐ. उ.
७	तत्त्वमसि	छां. अ. ६
८	यदधीना यस्य सत्ता-	
८	सच्च त्यच्चाभवत्	तै. उ.
८	बहु स्याम्	तै. उ.
८	एकस्सन् बहुधा विचारः	यजुरारण्यकं प्र. ३. अनु. ११
८	येनाश्रुतं श्रुतं भवति	छां. अ. ६
९	यथा सोम्यैकेन	छां. अ. ६
९	यथोर्णनाभिः	मुंडक.
९	तदात्मानं सृजाम्यहम्	गीता

पुटम्	प्रमाणम्	आकरः
१९	यद्वै तत् सुकृतम् रसो वै सः	तै. उ.
१९	यत्प्रयन्त्यभिसंविशन्ति	,,
१९	आनन्दं ब्रह्मणः	तै. उ.
१९	सदायतनाः सत्प्रतिष्ठाः	छां. अ. ६
१९	तज्जलानिति	छां.
१९	जीवाः प्रजायन्ते	
१९	तत्र चैवापियन्ति	
१९	आकाशं प्रत्यस्तंयन्ति	छां. १-९-१
१९	नारायणे प्रलीयन्ते	नारायणोपनिषत्
१९	अहं कृत्स्नस्य	गीता
१९	नासदासीन्नोसदासीत्	ऋ. १०-२९-१ तै. ब्रा. २-८-९-३ शतपथ १०-५-३-१
१९	यदा तमस्तन्न दिवा न रात्रिः	श्वेताश्व मं. ८
१९	तम आसीत्तमसा	ऋ. सं. १०-१२९-३
१९	तमो वा इदमेकमास	मैत्रायणी उ.
१९	आसीदिदम्	मनुस्मृति अ. १, श्लो. ५
१९	सर्वभूतानि कौन्तेय	गीता
२०	तमः परे देव एकीभवति	सुबालोपनिषत्
२०	परेऽव्यये सर्व एकीभवन्ति	मुं. ३-२-७
२०	स्वंह्यपीतो भवति	छां. अ. ६
२०	वाङ्मनसि संपद्यते	,, ,,
२०	प्रकृतिर्या मयाख्याता व्यक्ताव्यक्तस्वरूपिणी	वि. पु.
२०	मयाध्यक्षेण	गीता
२०	नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते	बृ. उ.
२०	अविनाशित्वात्	
२०	तथाहेयगुण ...	वि. पु.

पुटम्	प्रमाणम्	आकरः
२२	कामः…ह्रीर्धीर्भीः इत्येतत् सर्वं मन एव	बृ. ३-५-३
२२	महाभूतान्यहंकारो…उदाहृतम्	गीता
२३	यो ब्रह्माणं…मुमुक्षुर्वै शरणमहं प्रपद्ये	श्वे. उ.
२३	ब्रह्मविदाप्नोति परम्	तै. उ.
२३	तरति शोकमात्मवित्	छां. ७-१-३
२३	तमेवं विद्वानमृत इह भवति	पु. सू.
२३	छागपशुन्यायः	मीमांसान्यायः
२३	मत्वा धीरो न शोचति	कठ. उ.
२३	सर्वधर्मान् परित्यज्य	गीता
२३	अथवा सर्वपाप धर्मानित्यादि	रा. गीता. भा.
२४	दैवीह्येषा	गीता
२४	मामेवसत्यसंकल्पं … उपासते	रा. गीता. भा.
२४	अर्के चेन्मधु	आभाणकः
२५	भक्त्यादौ शक्त्यभावः	रहस्यत्रयसारः
२६	ब्रह्मणे त्वा महस ओमित्यात्मानम्	तै. आ.
२६	ओमित्येतेनैवाक्षरेण	षट्. प्र. उ.
२६	ज्ञात्वा तमेवम्	
२६	न्यास इति ब्रह्म … न्यास एवात्यरेचयत्	तै. आ. प्र. ४ अनु ७८
२६	धनुर्गृहीत्वौपनिषदं	मुंडक उ.
२६	प्रणवो धनुःशरो ह्यात्मा	,, ,,
२७	लक्ष्ये यत्र श्रुतिमितगुणाकृष्टि संकल्पसूर्योदय	प्र. अं. श्लो. २
२७	स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठां	मुंडक उ.
२७	द्वे विद्ये वेदितव्ये	,, ,,
२७	तदेतत् सत्यं तदमृतम्	मुंडक उ.
२७	तस्यैवं विदुषः	तै. आर.

पुटम्	प्रमाणम्	आकरः
२८	यन्मरणं तदवभृथः	तै. आर.
२८	एवंशरणमभ्येत्य—न संशयः	
२८	पुरुषविद्यायामपि चेतरेषामनाम्नानात्	ब्र. सू.
२९	यद्येवं यज्ञदृष्टिः	
२९	काम्यानां कर्मणां न्यासं	गीता
२९	श्रीमन्नारायणचरणौ शरणं प्रपद्ये	शरणागतिमन्त्रः
२९	आम्नातं कठवल्लीषु प्रपत्तेर्वाचिकद्वयम्	
३०	उपायभक्तिः प्रारब्धध्वंसयति—भूयसी	
३०	प्रपन्नादन्येषां न दिशति मुकुन्दो निजपदम्	रहस्यत्रयसारः
३०	इत्थं संघटितः पदैस्त्रिभिरसौ	
३१	सर्वधर्मान् परित्यज्य	गीता
३१	सकृदेव प्रपन्नाय	वा. रा.
३१	तावदार्तिः तथा	
३१	आनुकूल्यस्य संकल्पः—भविष्यति	पञ्चरात्रम्
३१	ध्याननिर्मथनाभ्यासात्	
३१	ततस्तु तं पश्यते निष्कलं	मुंडक उ.
३१	भिद्यते हृदयग्रन्थिः	काठक. उ.
३१	दृश्यते त्वग्र्यया बुद्ध्या	काठक. उ.
३२	मनसैवानुद्रष्टव्यम्	बृ. उ. ६-४-१९
३२	यन्मनसा न मनुते	तलवकार उ.
३२	आहारशुद्धौ सत्त्वशुद्धिः	छां.
३३	ननु शास्त्रयोनित्वं ब्रह्मणः	रामानुज सू. भा.
३३	प्रत्यक्षं द्विविधम्	न्यायपरिशुद्धिः
३३	यत्तु भाष्ये—श्रुतत्वादिति	शतदूषणी
३४	विज्ञानमानन्दं ब्रह्म	बृ. उ. ३-९-२८
३४	यदेष आकाश आनन्दो न स्यात्	तै. उ.

पुटम्	प्रमाणम्	आकरः
३४	रसं ह्येवायं लब्ध्वानन्दीभवति	तै. उ.
३४	एवमेवैष संप्रसादः—निष्पद्यते	छां. उ.
३४	संपद्याविहायस्वेनशब्दात्	ब्रह्म सू.
३५	भोगमात्रसाम्यलिंगाच्च	,, ,,
३५	श्रोत्रियस्यचाकामहतस्य	तै. उ.
३६	अथहैनं रैक्वः—देवे एकीभवति	सुबालोपनिषत्
३७	सूर्यद्वारेण ते विरजाः प्रयान्ति	मुंडक उ.
३७	यो भित्त्वा सूर्यमण्डलम्	याज्ञवल्क्य आध्यात्म प्र.
३७	आदित्यवर्णं तमसस्तु पारे	पुरु. सू.
३७	आदित्यवर्णं तमसः परस्तात्	,, ,,
३७	क्षयन्तमस्य रजसः पराके	
३७	त्वं हि नः पिता योऽस्माकं	षट्. उ.
३७	तस्मै मृदितकषायाय— सनत्कुमारः	
३७	तीर्त्वा तु—न निवर्तन्ति भारत	मोक्षधर्मः
३८	एवं प्राकृतरूपस्य—परमं हरेः	पाद्मम्
३९	स वा एष एवं पश्यन्	
३९	सोऽन्वेष्टव्यः स विजिज्ञासितव्यः	छां. ८. खं ७-१
३९	सर्वांश्च लोकानाप्नोति	,, ,,
३९	इमान् लोकान्	तै. उ.
४०	भूलोकं भुवर्लोकं—विसर्जयेत्	
४०	सर्वेभ्यो लोकेभ्यः ज्यायान्	
४०	अतो ज्यायांश्च पुरुषः	पुरुष सू.
४०	एतं सेतुं तीर्त्वा	छां. ८-४-२